# Shri Nrisimhapuratirthamahimavarnanam

# શ્રીનૃસિંહપુરતીર્થમહિમાવર્ણનમ્

## Document Information

Text title : Shri Nrisimhapuratirtha Mahima Varnanam

File name : nRRisiMhapuratIrthamahimAvarNanam.itx

Category : vishhnu, dashAvatAra, viShNu, padmapurANa, tIrthakShetra

Location : doc_vishhnu

Proofread by : Manoj Kumar Barman

Description/comments : nRRisiMhakosha 3 upAsanA khaNDa uttarArdha. padmapurANe shrInRisiMhapuramAhAt
shrIshivapArvatI saMvAde

Latest update : August 11, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 11, 2025

*sanskritdocuments.org*

# શ્રીનૃસિંહપુરતીર્થમહિમાવર્ણનમ્

દક્ષિણ પ્રયાગ માહાત્મ્ય

## પ્રથમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ । શ્રીલક્ષ્મીનૃસિંહાય નમઃ ॥

લક્ષ્મીશોભિતવામભાગમમલં સિંહાસને સુન્દરમ્ ।
સવ્યે ચક્રધરં ચ નિર્ભયકરં વામેન ચાપં વરમ્ ॥

સર્પાધીશકૃતાતપત્રમમલં શ્રીવત્સવક્ષઃસ્થલમ્ ।
વન્દે દેવમુનીન્દ્રવન્દિતપદં લક્ષ્મીનૃસિંહં વિભુમ્ ॥ ૧॥

શ્રુત્વા માહાત્મ્યમતુલં ક્ષેત્રાણાં સરહસ્યકમ્ ।
સર્વાર્થૈકપદં ગુહ્યમપૃચ્છન્ મુનયોઽમલાઃ ॥ ૨॥

કો દેવઃ સર્વદેવાનાં ક્વાસ્તે કીદૃગવિધઃ કથમ્ ।
પૂજ્યો મન્ત્રોઽસ્ય કઃ સૂત સર્વં તચ્ચ વદસ્વ નઃ ॥ ૩॥

સૂત ઉવાચ ।
મુનયઃ સાધુપૃષ્ટોઽહં લોકાનાં હિતમીપ્સુભિઃ ।
વક્ષ્યે ગુહ્યં ભગવતે નત્વા વ્યાસાય ધીમતે ॥ ૪॥

એકદા રહસિ સ્થાણું સમાધિનિરતં સતી ।
પ્રણમ્યોવાચ મધુરં જિજ્ઞાસુર્ગુહ્યમાત્મનિ ॥ ૫॥

દેવ્યુવાચ ।
સર્વજ્ઞ પ્રાણનાથેશ પ્રસાદં કુરુ શઙ્કર ।
કિં ધ્યાયસે ચિરં ચિત્તે ધ્યેયસ્તે કઃ પરાત્મનઃ ॥ ૬॥

ઇત્થં ચેત્કૃપયા તેઽદ્ય શ્રોષ્યામ્યાર્તાર્તિનાશન ।
તવ પ્રસાદાદહમપ્યન્તસ્તં ચિતયે વિભુમ્ ॥ ૭॥

શ્રીશિવ ઉવાચ ।
શ ृણુ દેવિ પરં ગુહ્યમનાખ્યેયમપિ ક્વચિત્ ।
વક્ષ્યે ધ્યેયં સદા યત્તદનિર્દેશ્યં મનોગિરામ્ ॥ ૮॥

યદેકમજરં શાન્તં સચ્ચિદાનન્દરૂપકમ્ ।
અનાખ્યં નરસિંહેતિ પ્રસિદ્ધં ચિન્તાયામિ તત્ ॥ ૯॥

આત્મા યઃ સર્વભૂતાનામનાદિનિધનોઽવ્યયઃ ।
સ્વપ્રકાશઃ સુરાધીશૈરભિવન્દ્યપદામ્બુજઃ ॥ ૧૦॥

એષઃ સ્વલીલયા વિશ્વં સૃજત્યવતિ હન્ત્યજઃ ।
નાનાવતારૈર્વિશ્વાત્મા ક્રીડત્યદ્ભુતવિક્રમઃ ॥ ૧૧॥

દેવાનાં ગુણલિઙ્ગાનામેષ કારણમક્ષરમ્ ।
ક્ષરાક્ષરવિભેદાભ્યામેષ સર્વત્ર રાજતે ॥ ૧૨॥

અલિઙ્ગઃ સર્વલિઙ્ગાત્મા પ્રાણલિઙ્ગો મહેશ્વરિ ।
નૃસિંહોઽખણ્ડમાત્મસ્થઃ સ્વાત્મના ચિન્ત્યતે વિભુઃ ॥ ૧૩॥

દેવ્યુવાચ ।
દેવેશ જગદીશાન સર્વજ્ઞ કરુણાકર ।
જ્ઞાત આત્મા નૃસિંહેતિ પ્રસાદાત્તવ શઙ્કર ॥ ૧૪॥

કથં જ્ઞેયો મહામૂઢૈરજિતાત્મભિરીશ્વરઃ ।
તન્મામાખ્યાહિ યત્રાસૌ સુખેનાવાપ્યતેઽખિલૈઃ ॥ ૧૫॥

શ્રીશિવ ઉવાચ ।
જ્ઞેયો ભક્ત્યૈવ નૃહરિર્લબ્ધ્વા સત્સમાગમાત્ ।
વિરક્તઃ સર્વભોગેષુ સર્વાત્મા સર્વતોમુખઃ ॥ ૧૬॥

બાલા વા જ્ઞાનિનઃ સક્તા વિરક્તા વા ગુણાત્મકાઃ ।
મુચ્યેરન્ સંસૃતેર્ભક્ત્યા હરેઃ સત્સઙ્ગલબ્ધયા ॥ ૧૭॥

ભક્તિસ્તદેકનિષ્ઠા યા કાયવાઙ્મનસા સદા ।
બહુભિર્બહુધા પ્રોક્તા સદ્યઃ સંસૃતિહારિણી ॥ ૧૮॥

અનન્તજન્મસાહસ્રૈઃ સઞ્ચિતૈઃ પુણ્યરાશિભિઃ ॥

ભક્તિસ્યાન્નૃહરૌ ભવ્યા સર્વાત્મન્યખિલાશ્રયે ॥ ૧૯॥

નાનાપાતકયુક્તોઽપિ મૂઢોઽપ્યવિજિતેન્દ્રિયઃ ।

લીલયાપ્નોતિ કૈવલ્યં નૃહરેર્નામકીર્તનાત્ ॥ ૨૦॥

દુરારાધ્યો નૃભિર્મૂઢૈરવિપક્વેદ્રિયૈરયમ્ ।
સુખેનાવાપ્યતે યત્ર તદ્ગુહ્યં બ્રવીમિ તે ॥ ૨૧॥

પુરા ત્રિપુરદાહેન તપ્તાશેષતનોર્મમ ।
સુધાંશુગઙ્ગાસઙ્ગોઽપિ ન શાન્ત્યૈયદભૂચ્છિવે ॥ ૨૨॥

તદા ભીમતનોરગ્રે સુરાઃ સ્થાતુમનીશ્વરાઃ ।
ગત્વા બ્રહ્માદયો વિષ્ણું શરણ્યં સુવ્યજિજ્ઞપન્ ॥ ૨૩॥

દેવા ઊચુઃ ।
જય શાન્ત બલાધાર વિશ્વરૂપ પરાત્પર ।
વિષ્ણો ત્રિપુરસંહર્તુર્દાહં શમય માધવ ॥ ૨૪॥

એષ વીરો મહાભીમ ઉગ્રઃ ક્રોધાગ્નિદીપનઃ ।
ત્રિનેત્રો દાહસન્તપ્તો ગ્રાસં કર્તા ઘનઃ સ્ફુટમ્ ॥ ૨૫॥

પાહિ પાહિ ત્રિલોકેશ હાલાહલગિલાનનાત્ ।
અકાણ્ડે પ્રલયો મા ભૂદચ્યુતાશ્રિતદેહિનામ્ ॥ ૨૬॥

શ્રીશિવ ઉવાચ ।
ઇતિ વિક્લવિતં તેષાં સુરાણાં વીક્ષ્ય માધવઃ ।
પ્રહસ્ય મેઘગમ્ભીરાં બભાષે વાચમમૃતામ્ ॥ ૨૭॥

શ્રીભગવાનુવાચ ।
અભયં વોઽમરા અસ્તુ શિવલીલાનિવેશતઃ ।
એતસ્માન્નહિ સાધૂનાં ભીતિર્વિશ્વાત્મરૂપિણઃ ॥ ૨૮॥

ભીમોઽયં કિલ ભીમાનાં મૃત્યોર્મૃત્યુઞ્જયોઽસૌ ।
કાલસ્યાપિ મહાકાલઃ શિવાનાં તુ શિવં સ હિ ॥ ૨૯॥

અયં મે હૃદયં શમ્ભુરસ્યાહં હૃદયં પરમ્ ।
ઇતિ જાનાતિ તત્ત્વેન યઃ સમુચ્યેત સઙ્કટાત્ ॥ ૩૦॥

અસ્તિ તત્ર સરિત્ પુણ્યા ભીમા ભીમાઙ્ગસમ્ભવા ।
નીરાકારં વપુઃ કૃત્વા વિધાસ્યે તત્ર સઙ્ગમમ્ ॥ ૩૧॥

અતોઽહં દ્રવરૂપેણ સ્વાં શક્તિં પ્રેરયન્ સુરાઃ ।
તમદ્યદ્રવરૂપેણ ક્રીડન્તં સમુપૈમિ ભોઃ ॥ ૩૨॥

તત્ર યૂયં સમાયાત સર્વે સર્વાર્થસાધકમ્ ।
દ્રષ્ટું ભીમાદ્રવાયોગં લોકાન્ના હિતમીપ્સવઃ ॥ ૩૩॥

શ્રીશિવ ઉવાચ ।
ઇત્યાદિશ્ય સુરાન્ વિષ્ણુસ્તત્રૈવાન્તરધીયત ।
દેવઃ સદ્યોદ્રવાકારં દદૃશુર્વિસ્મિતાન્તરાઃ ॥ ૩૪॥

તદૈવ મે હ્યઙ્ગભૂતા નદી સર્વાઘહારિણી ।
ચચાર નીરયા ભીમા પાવની સર્વદેહિનામ્ ॥ ૩૫॥

દેવા ઉભયતઃ કૂલે પશ્યન્તો હૃષ્ટમાનસાઃ ।
યયુર્યત્રોભયોઃ સઙ્ગઃ પ્રત્યગાત્મા હરિઃ સ્થિતઃ ॥ ૩૬॥

આલોક્યાત્મૈકસૌખ્યં શ્રીમન્દિરં સુન્દરોત્તમમ્ ।
પ્રણમ્ય સ્તુતિભિઃ સ્તુત્વા દિવ્યપુષ્પૈરવાકિરન્ ॥ ૩૭।
નદીસઙ્ગમસુસ્નાતા હતપાપતમોભરાઃ ।
નૃસિંહદર્શનાનન્દનિર્ભરાસ્તેઽભવન્સુરાઃ ॥ ૩૮॥

તદ્દેવિ પરમં ક્ષેત્રં સિદ્ધીનાં પરમાયનમ્ ।
આસ્તે યત્રાનિશં દેવો નૃસિંહો ભક્તવત્સલઃ ॥ ૩૯॥

સુદર્શનમિત્યભિહિતં ક્ષેત્રં યદ્ વેદવિદ્વરૈઃ ।
તન્નાભિરેષ ભૂગર્ભે ક્ષેત્રરાજો વિરાજતે ॥ ૪૦॥

કલિકલ્મષબુદ્ધીનાં મહાપાપકૃતામપિ ।
દર્શનાત્પાપરાશિઘ્નો ભજનાદ્ ભુક્તિમુક્તિદઃ ॥ ૪૧॥

અત્રૈવ મૃગ્યઃ સર્વાત્મા નૃસિંહો ભવભીરુભિઃ ।
ધ્યેયઃ પૂજ્યો નમસ્યોઽયં સર્વાર્થૈકામરદ્રુમઃ ॥ ૪૨॥

@ઇતિ શ્રીપદ્મપુરાણે નૃસિંહપુરમાહાત્મ્યે શિવપાર્વતી સંવાદે
ક્ષેત્રોત્પત્તિકથનં નામ પ્રથમોઽધ્યાયઃ ।

## દ્વિતીયોઽધ્યાયઃ

દેવ્યુવાચ ।
કાસૌ શક્તિદ્રવીભૂતા વિષ્ણોસ્તે જીવિતેશ્વર ।
કિં નામ કથમાખ્યાભૂદ્યુદયોરિતિ શંસ મે ॥ ૧॥

શ્રીશિવ ઉવાચ ।
યા શક્તિર્વૈષ્ણવી દેવિ દ્રવીભૂતામલાશિવા ।
સા નીરેતિ સમાખ્યાતા વિષ્ણુતત્ત્વૈકવાદિભિઃ ॥ ૨॥

નયની સર્વભાવાન્નાં નીરા યા કથ્યતે બુધૈઃ ।
સા નીરા પ્રથિતા લોકે વિષ્ણોઃ શક્તિઃ પરેશ્વરી ॥ ૩॥

નિઃશેષરમણા નીરા ચિદ્રસાનન્દવર્ધિની ।
નીરાકારા હરિતનુઃ સેવ્યા સુરમુનીશ્વરૈઃ ॥ ૪॥

નાનાસિદ્ધિપ્રદા પુણ્યા પુણ્યવદભિરવાપ્યતે ॥ ।

તથા ભીમેતિ વિખ્યાતા મમશક્તિઃ શિવાશિવે ॥ ૫॥

નાશં નયતિ પાપાનિ લોકાનાં યા સ્વરૂપતઃ ।
ભીમસ્ય મે દ્રવતનુર્ભીમા લોકેષુ પઠ્યતે ॥ ૬॥

ઇયં હરતિ લોકાનાં ભીતિં હિ ભવસિન્ધુતઃ ।
નીરાહરિરહં ભીમા દ્વયોર્યોગઃ સુદુર્લભઃ ॥ ૭॥

સઙ્ગમોઽયં ભુવિ ખ્યાતઃ પ્રયાગ ઇતિ પાવનઃ ।
અભવદ્યજનં યત્ર પ્રહર્ષમગમન્ સુરાઃ ॥ ૮॥

પ્રયાગમિતિ વિખ્યાતં પ્રયાગાત્કોટિપુણ્યદમ્ ।
મહર્ષિભિઃ કથિતો યસ્ય મહિમા શ‍ૃણુ પાર્વતિ ॥ ૯॥

નીરાભીમરથીયોગં યે શ્રૃણ્વન્તિ વિદૂરતઃ ।
તે પાપપઞ્જરં હિત્વા યાન્તિ વિષ્ણોઃ પરં પદમ્ ॥ ૧૦॥

કિં પુનઃ શ‍ૃદ્ધયા નિત્યં યે સેવન્તે મહાધિયઃ ।
નૃસિંહમૂર્તિ સન્દૃષ્ટ્વા પુરીં પ્રાપ્તા મહોદયાઃ ॥ ૧૧॥

નીરા નીરેતિ ભીમેતિ સકૃન્નામ જપન્તિ યે ।
તેષાં નામૈવ ગૃણતાં યમદૂતા ન ગોચરાઃ ॥ ૧૨॥

નીરાભીમામ્બુકલ્લોલદર્શનોદિતચેતસામ્ ।
પિતરો નરકાદ્યાન્તિ બહિર્વિમલિતાશયાઃ ॥ ૧૩॥

ઇચ્છન્તિ તે સદાત્યેતદહો નઃ કુલદીપકઃ ।
કશ્ચિદ્ગતા નરો યોગં નીરાભીમોદ્ભવં સુધીઃ ॥ ૧૪॥

તર્પયિષ્યતિ સુસ્નાતઃ શ્રાદ્ધં ભક્ત્યા કરિષ્યતિ ।
તેન તૃપ્તા દિવં ગત્વા વત્સ્યામઃ શાશ્વતીઃ સમાઃ ॥ ૧૫॥

નીરા ભીમરથીયોગં દ્રષ્ટુસ્તુષ્ટાઃ પિતામહાઃ ।
પુષ્ટિં દદાતિ ધર્મસ્ય કષ્ટાન્ દૂરે દધત્યલમ્ ॥ ૧૬॥

નીરાભીમરથીયોગે સ્નાતસ્યાઙ્ગેષુ બિન્દવઃ ।
તાવન્ત્યબ્દ્સહસ્રાણિ વસતિઃ સ્મર્યતે દિવિ ॥ ૧૭॥

યમુદ્દિશ્યાઞ્જલિં દત્તે નીરાભીમામ્બુસઙ્ગમે ।
સ વિમાનમુપારુહ્ય તત્ક્ષણાન્મુચ્યતે ભવાત્ ॥ ૧૮॥

નીરા ભીમરથીયોગે શ્રાદ્ધં કૃત્વા વિચક્ષણઃ ।
આકલ્પં નયતે તૃપ્તિં પિતૄનેકોત્તરં શતમ્ ॥ ૧૯॥

યે નાનાયોનિગતારો યે નાનાનરકાર્દિતાઃ ।
તે મુચ્યન્તે ક્ષણાદેવ નીરાભીમામ્બુતર્પણાત્ ॥ ૨૦॥

એકં સમ્ભોજયઞ્જીવં નીરાભીમામ્બુસઙ્ગમે ।
ત્રૈલોક્યતૃપ્તિં વિધિવન્નયેદાકલ્પિકીં નરઃ ॥ ૨૧॥

યત્ર શ્રીમાન્ નરહરિઃ કૈવલ્યાદ્યખિલાર્થદઃ ।
ભક્તાનુગ્રહવાનાસ્તે સરૂપોઽરૂપવાનપિ ॥ ૨૨॥

અહો ક્ષેત્રસ્ય માહાત્મ્યં કો વિજાનાતિ તત્ત્વતઃ ।
સહસ્રવદનોઽપ્યાહો યત્ર મૂક ઇવ સ્થિતઃ ॥ ૨૩॥

એવં નરહરેઃ સાક્ષાત્ સચ્ચિદાનન્દરૂપિણઃ ।
શરીરં ક્ષેત્રરૂપેણ પ્રતિષ્ઠામાપ્તમત્ર હિ ॥ ૨૪॥

વાલુકાવિષ્ણુરૂપેણ તરવો વિબુધોત્તમાઃ ।
પક્ષિણો મુનયો યત્ર માનવાશ્ચિદ્રસાત્મકાઃ ॥ ૨૫॥

સદા પુણ્યતમઃ કાલો દેશઃ પુણ્યતમઃ સદા ।
સદા પાત્રં પવિત્રં હિ યત્ર દેવો નૃકેસરી ॥ ૨૬॥

તત્તીર્થં તીર્થતરણં તત્સાધનમનુત્તમમ્ ।
સા સિદ્ધિર્મહતી દેવિ યન્નૃસિંહેતિ કીર્તનમ્ ॥ ૨૭॥

યસ્ય લીલાતનોઃ પૂર્વં પશ્ચાદ્વાપાર્શ્વ ઇત્યલમ્ ।
ન શક્યતેઽધિકં કર્તું પરિપૂર્ણસ્ય સર્વતઃ ॥ ૨૮॥

તથાપિ લીલયા તસ્ય ગતીનાં નિયમઃ કૃતઃ ।
તેનૈવ પશ્યતાં દેવિ બ્રહ્માદીનાં પુરઃ પુરા ॥ ૨૯॥

દેવાગ્રે મુક્તિરુદ્દિષ્ટામૃતાનાં પૃષ્ઠતોધનમ્ ।
વામે સ્વર્ગોઽથ વિજ્ઞાનં દક્ષિણે પરમાત્મનઃ ॥ ૩૦॥

લબ્ધ્વા ભરતવર્ષેઽત્ર જન્મમાનુષમુત્તમમ્ ।
ન ગચ્છેન્નૃહરેઃ સ્થાનં સ શોચ્યોવઞ્ચિતો બત ॥ ૩૧॥

નૃશબ્દો જીવવાચીહ સિંશબ્દો બન્ધવાચકઃ ।
નૃસિં હન્તા નૃસિંહોઽયં જીવબન્ધવિનાશકઃ ॥ ૩૨॥

નૃસિંહેણાભિતો જ્ઞાનં ભક્તિવૈરાગ્યયોગતઃ ।
પૂર્ણં પુરં ત્રિલોકસ્થૈર્નૃસિંહપુરમીર્યતે ॥ ૩૩॥

એતદ્રહસ્યં ત્રિષુ વિષ્ટપેષુ રહસ્યમેતત્ ત્રિષુ વૈદિકેષુ ।
એતદ્રહસ્યં ત્રિગુણેશ્વરેષુ સઙ્ગીયતે વેદશિરોભિરાર્યૈઃ ॥ ૩૪॥

એતત્ત્રયાણાં લોકાનામુપરિષ્ટાત્પુરાસ્થિતમ્ ।
મદનુગ્રહતો ભૂમૌ ખ્યાતિમાગાદનુત્તમામ્ ॥ ૩૫।
બ્રહ્મણા તુ પુરા પ્રોક્તં રહસ્યં મે પ્રસઙ્ગતઃ ।
મયા પ્રોક્તં નારદાય સુરેભ્યઃ પ્રાહ યો મુદા ॥ ૩૬॥

તતો લોકેષુ વિખ્યાતમભૂત્પાપહરં પરમ્ ।
સદ્યઃ સિદ્ધિકરં દેવિ મહામોક્ષૈકસાધકમ્ ॥ ૩૭॥

વિના જપં વિના ધ્યાનં વિનાચેન્દ્રિયસંયમમ્ ।
યથાત્ર ભુક્તિર્મુક્તિશ્ચ ન તથાન્યત્ર કુત્રચિત્ ॥ ૩૮॥

સન્તિ પુર્યોવનાનીહ સરિચ્છૈલસરાંસ્યહો ।
ન નૃસિંહસમો દેવો નીરાભીમાકૃતાલયઃ ॥ ૩૯॥

એકતઃ સર્વતીર્થાનિ નૃસિંહપુરમેકતઃ ।
ન ભવન્તિ સમાન્યાયૈં ભુક્તિમુક્તિમહર્દ્ધિભિઃ ॥ ૪૦॥

કલિકલ્મષબુદ્ધીનાં પુરતો મૃણ્મયં સ્ફુટમ્ ।
ભવિષ્યતિ મહાક્ષેત્રં સર્વતેજોમયં ત્વિદમ્ ॥ ૪૧॥

ન કર્લિન ચ વા કાલો નાધિર્નવ્યાધિરુલ્બણા ।

યત્ર જાગર્તિ ચણ્ડોગ્રો મૃત્યોર્મૃત્યુર્નૃકેસરી ॥ ૪૨॥

તાવત્પાતકમાતઙ્ગા ગર્જન્તિ ભુવિ નિર્ભયાઃ ।
યાવદ્ ભીમાતટોલ્લાસિ સિંહનામ ન વાક્પથે ॥ ૪૩॥

પ્રસઙ્ગાદુપહાસાદ્વા સઙ્કેતાદુપકીર્તિતમ્ ।
નૃસિંહેતિ સકૃન્નામ દહેત્ પાપૌઘપઞ્જરમ્ ॥ ૪૪॥

સ યત્ર લીલામાસ્થાય રમતેઽનન્તશક્તિમાન્ ।
તતઃ કિં પરમ્મ લોકે વર્ણનીયં ફલાર્થિભિઃ ॥ ૪૫॥

દેવિ તત્રાસ્થિતો જન્તુર્લીલયાપ્નોતિ યાં ગતિમ્ ।
સા યોગૈરુત યાગાદ્યૈઃ પ્રાપ્તુમન્યત્ર દુર્લભા ॥ ૪૬॥

અલં યોગૈરલં યાગૈલં દીનવ્રતાદિભિઃ ।
પ્રાપ્તિર્યદિસ્યાન્નહરેઃ પદસ્યાસ્યમહૌજસઃ ॥ ૪૭॥

શ્રીનૃસિંહકરાગ્રેણ કલ્પાન્તનખરોજ્જ્વલમ્ ।
ત્રિકોણમસ્ત્રમેતદ્ધિ રાજતે પરમર્દ્ધિભિઃ ॥ ૪૮॥

તત્તીર્થં વરમદ્યાપિ શ્રૂયતે પુણ્યગૌરવાત્ ।
યત્ર શ્રીસિંહવદનઃ શ્રવણાદેવ મોક્ષદઃ ॥ ૪૯॥

નીરામીમાસમુત્પત્તિમાહાત્મ્યં નૃહરેઃ પુરમ્ ।
શ્રૃણુયાત્કીર્તયેદ્ભક્ત્યા યઃ સ પાપૈઃ પ્રમુચ્યતે ॥ ૫૦॥

@ઇતિ શ્રીપદ્મપુરાણે નૃસિંહપુરમાહાત્મ્યે શ્રીશિવપાર્વતીસંવાદે
નૃસિંહપુરક્ષેત્રમહિમાવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ।

## તૃતીયોઽધ્યાયઃ

સૂત ઉવાચ ।
નૃસિંહપુરમાહાત્મ્યં શ્રુત્વા દેવી મુદાન્વિતા ।
પુનઃ પપ્રચ્છ ભાવેન પ્રણમ્ય ગિરિશં સતી ॥ ૧॥

દેવ્યુવાચ ।
સાધુ સાધુ મહાપુણ્યં રહસ્યં કથિતં ત્વયા ।
માહાત્મ્યં પુરવર્યસ્ય મહાપાપૌઘનાશનમ્ ॥ ૨॥

કિયત્પ્રમાણં તત્ક્ષેત્રં કિમારભ્ય ભુવં ગતમ્ ।

તીર્થાન્યત્ર કતિ સ્વામિન્ સર્વં વર્ણય વિસ્તરાત્ ॥ ૩॥

શ્રીશિવ ઉવાચ ।
શિવે સાધુ મહાક્ષેત્રમેતદ્ બુદ્ધેરગોચરમ્ ।
પ્રમાણં યાવદાકાશં યાવચ્ચિત્તસ્ય વિસ્તરઃ ॥ ૪॥

એતદ્ગૌણમપિ પ્રાયો મુખ્યં કેચિદ્ હિ મન્વતે ।
અન્યાનિ ક્ષેત્રજાતાનિ ક્ષેત્રં પ્રાહુર્વિપશ્ચિતઃ ॥ ૫॥

લોકાનાં મૂઢદૃષ્ટીનાં તત્ત્વજ્ઞાને કુચેતસામ્ ।
સંસારાબ્ધિપ્લવો દૃષ્ટઃ ક્ષેત્રરાજોઽયમુત્તમઃ ॥ ૬॥

પઞ્ચક્રોશં હરિપુરં નગરં યોજનત્રયમ્ ।
દેવાલયં યોજનાર્થં પ્રમાણમિતિ વિશ્રુતમ્ ॥ ૭॥

ગણરાજોમ્બિકા દુર્ગા શારદા બહિરાસ્થિતાઃ ।
ક્ષેત્રસ્યાસ્ય મહાવિઘ્નાન્ સંહર્તું દિક્ષુ વૈ ક્રમાત્ ॥ ૮॥

તદન્તરાયુધાન્યસ્ય દક્ષિણોત્તરયોઃ પૃથક્ ।
રક્ષન્તિ સકલાપદ્ભ્યો મહાક્ષેત્રમિદં ભિયે ॥ ૯॥

દેવાલયે સુરગણા મુનયઃ સિદ્ધચારણાઃ ।
ગન્ધર્વાપ્સરસો નાગા યક્ષરક્ષાંસિ કિન્નરાઃ ॥ ૧૦॥

વસવોઽષ્ટૌ તથા રુદ્રા આદિત્યાઃ સમરુદ્ગણાઃ ।
અહં બ્રહ્મા વિશ્વરૂપો ગણેશઃ સનકાદયઃ ॥ ૧૧॥

દેવા અન્યે ચ શતશો રક્ષતિ ક્ષેત્રમુત્તમમ્ ।
નિધિં યથા ભૂતગણા ઉગ્રવેષાઃ સમન્તતઃ ॥ ૧૨॥

એતત્પુરા મહાકલ્પે બ્રહ્મણોમ્બુજશાયિનઃ ।
અનુગ્રહાયાવિરભૂદ્ દિવ્યં ભુવિ મહાદ્ભુતમ્ ॥ ૧૩॥

દેવ્યુવાચ ।
ભગવન્નનુગ્રહઃ કૃતો બ્રહ્મણો હરિણા કથમ્ ।
કથં ભુવિ ગતં તચ્ચ સર્વં વિસ્તરતો વદ ॥ ૧૪॥

શ્રીશિવ ઉવાચ ।
કલ્પાન્તે યોગશય્યાયા ઉત્થિતે કમલાપતૌ ।
સિસૃક્ષાસીત્પુરા તત્ર પદ્મનાભેરુદાયયૌ ॥ ૧૫॥

તન્મધ્યે રજસા યુક્તો બ્રહ્માભૂદ્ વિશ્વસૃક્પતિઃ ।
તસ્ય સ્વમૂલપદ્મસ્ય મૂલેક્ષાસીદયે સતિ ॥ ૧૬॥

સ વર્ષાણાં શતં પશ્યન્ નાલરન્ધ્રેણ તત્પદમ્ ।
નાવિન્દદથ સઙ્ક્લિષ્ટો ભૂત્વા પદ્મોપરિ સ્થિતઃ ॥ ૧૭॥

તત્ર શ્રીનૃહરિઃ પ્રેમ્ણા વ્યોમાત્મા ગૂઢમાહતમ્ ।
તપસ્તપેતિ તં મત્વાનુગ્રહં સ તતાપ હ ॥ ૧૮॥

સ વર્ષશતમેકાગ્રસમાધૌ પરિતિષ્ઠતઃ ।
તસ્યેદં દર્શયામાસ રૂપં નારાયણો હરિઃ ॥ ૧૯॥

સહસ્રશીર્ષાઃ પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
સહસ્રબાહુર્વિશ્વાત્મા લોકાન્વ્યાપ્ય વ્યવસ્થિતઃ ॥ ૨૦॥

દિવ્યાભરણશોભાઢ્યો દિવ્યગન્ધાનુલેપનઃ ।
દિવ્યમાલ્યામ્બરધરો દિવ્યાયુધવિભૂષિતઃ ॥ ૨૧॥

સર્વલક્ષણલક્ષણ્યઃ સર્વસૌભાગ્યશેવધિઃ ।
સર્વમન્ત્રમયોદેવઃ પ્રાહાલં તપસા વિધે ॥ ૨૨॥

ઇતિ પીયૂષમધુરાં નિપીયાબ્જભવોગિરમ્ ।
સ સઞ્જીવ ઇવ પ્રેમ્ણા પ્રફુલ્લવદનામ્બુજઃ ॥ ૨૩॥

પ્રણમ્ય દેવદેવેશં પ્રણતાર્તિહરં હરિમ્ ।
અસ્તૌષીદેકમનસા હરિદર્શનલબ્ધધીઃ ॥ ૨૪॥

બ્રહ્મોવાચ ।
નમોઽસ્તુ લીલામયવિગ્રહાય સ્વરૂપદૃષ્ટ્યાહતસદ્ભ્રમાય ।
નમઃ પરાનન્દપરાલયાય સ્વભાવસમ્પત્તિમહોદયાય ॥ ૨૫॥

નમો ગુણાનાં પતયે મહિમ્ને વિકારધામ્નેઽખિલકારણાય ।
નમો જગદ્ભાસયતે ગરિમ્ણે સતે ચિદાત્માકૃતયે ગુણાય ॥ ૨૬॥

ત્વમાદિરસ્યાસિ નિદાનમધ્યં વિશ્વાકૃતિસ્ત્વં પ્રલયો વિભુસ્ત્વમ્ ।
ત્વં સર્વયોનિસ્ત્વમસર્વયોનિસ્ત્વં સર્વશોઽસિત્વમસર્વશશ્ચ ॥ ૨૭॥

નમઃ પુરસ્તાદથ પાર્શ્વયોસ્તે પશ્ચાન્નમોન્તર્બહિરીશ્વરાય ।
પૂર્ણાદ્વિતીયાય નમઃ પરાય અણીયસેઽનન્તચિદે પરસ્મૈ ॥ ૨૮॥

વનેઃ સ્ફુલિઙ્ગા ઇવ વારિમ્ભઙ્ગાઃ સિન્ધોરિવૌઘા ઇવ વાસનાનામ્ ।

ભવન્તિ તિષ્ઠન્તિ વિયન્તિ યત્ર બ્રહ્માણ્ડસઙ્ઘાસ્તમજં પ્રપદ્યે ॥ ૨૯॥

યદીક્ષયા જનિરસ્યાપ્રમેયો વિભુર્નૃસિંહો વરદો મમાસ્તુ ।
યોનાહમસ્મિન્ વિવિધેઽત્રસઙ્ગે સમ્પ્રેરિતઃ કાલવિનષ્ટદૃષ્ટિઃ ॥ ૩૦॥

યસ્યાદેશાત્ સર્ગકર્મપ્રવૃત્તો ભૂત્વાપ્યહં કાલસમ્મૂઢચેતાઃ ।
સ પુણ્યવાચા મમ સૃષ્ટિમેતામલઙ્કરોતુ પ્રભવિષ્ણુરીશઃ ॥ ૩૧॥

ઇહૈવ લોકો હ્યસમીક્ષ્ય બદ્ધો માયાગુણૈઃ કામયતે નુ કામાન્ ।
યચ્છન્નમુષ્મૈ ય ઇહાપ્રમેયો હરત્યનન્તો નિમિષં પ્રસીદ ॥ ૩૨॥

નમો નિયન્ત્રે નિયમાલયાય નમો જગન્મોહતમોરુણાય ।
નમો નૃસિંહાય વિલાસધામ્ને નમઃ શિવાયામિતવિક્રમાય ॥ ૩૩॥

નમો મનોદૂરચરાય વાચાં બાચામનિર્દેશ્યપદાય ભૂમ્ને ।
નમઃ સ્વભાસાખિલભાસકાય પ્રમાણમાત્રે જગદીશ્વરાય ॥ ૩૪॥

શ્રીશિવ ઉવાચ ।
ઇતિ સ્તુત્વા યથાપ્રજ્ઞમજમાત્માનમીશ્વરમ્ ।
તૂષ્ણીં બભૂવ વિશ્રાન્ત ઇવ સ્વે મનસીશ્વરઃ ॥ ૩૫॥

તતઃ પ્રસાદમધુરસ્મિતપીયૂષસન્મુખઃ ।
પ્રાહ દેવેશ્વરો વાચા જીવયન્નિગમાનિવ ॥ ૩૬॥

શ્રીભગવાનુવાચ ।
અબ્જયોને પ્રસન્નોઽહં વરં વરય સુવ્રત ।
આદેશાન્મમ યત્પૂર્વં તપસ્તમં ત્વયા ખલુ ॥ ૩૭॥

સર્વત્ર મદ્ભાવનયા દૂરયસ્વ રજો મહત્ ।
અહમેવાખિલં વસ્તુ સદસત્પરમવ્યયમ્ ॥ ૩૮॥

ભૂતં ભવ્યં ભવચ્ચાન્યન્નમત્તોઽસ્તિ ચરાચરમ્ ।
મય્યેવ મન આધત્સ્વ રજોગુણનિવૃત્તયે ॥ ૩૯॥

યદાત્મનિ ન નિર્ભાતમાભાતિ ચ નિરર્થકમ્ ।
તત્તમ બિમ્બવન્માયાં જાનીહિ હીનદર્શનમ્ ॥ ૪૦॥

મદાત્મા મદ્વિકારસ્ત્વં મત્કર્મા મદવસ્થિતિઃ ।
મયાત્મના સૃજન્ સર્વમપિ નો લિપ્યસે ગુણૈઃ ॥ ૪૧॥

સિદ્ધં સર્વેશ્વર ત્વત્તઃ સર્વં મે યદભીપ્સિતમ્ ।

કામદ્રુમમવાપ્યાહો કઃ શોચેત હિ પણ્ડિતઃ ॥ ૪૨॥

તથાપિ યાચે હ ભવતઃ શાસનેન મહેશ્વર ।
સ્થાતવ્યં ભુવિ દેવેશ રૂપેણાનેન સર્વગ ॥ ૪૩॥

યે મૂઢા યે દુરાચારા યે ચ કામહતા નરાઃ ।
તેષાં મદાન્ધમનસાં પ્રસાદં કર્તુમર્હસિ ॥ ૪૪॥

શ્રીભગવાનુવાચ ।
વિધેદ્યારભ્ય તિષ્ઠામિ ભુવિ લોકહિતઙ્કરઃ ।
શ્રવણાદ્દર્શનાધ્યાનાત્કાયવાઙ્મનસાઘહૃત્ ॥ ૪૫।
જમ્બુદ્વીપે ભારતેઽહં ગોદાકૃષ્ણાન્તરાવનૌ ।
તિષ્ઠામિ શમ્ભુના સાર્ધમેકરૂપઃ સતાં ગતિઃ ॥ ૪૬॥

નૃસિંહનામા જીવાનાં બન્ધહા વરદેશ્વર ।
સ્થાસ્યામિ દૃશ્યાદૃશ્યાત્મા નાનાશક્તિભિરાદરાત્ ॥ ૪૭॥

તવાનુગ્રહકામાય લોકાનાં હિતમીપ્સયા ।
સ્થિતોઽપિ પાપૈર્દુર્લભ્યઃ પ્રાયશોઽહં પ્રજાધિપ ॥ ૪૮॥

તથાપિ પૂર્વદત્તં તે વચનં કર્તુમિચ્છયા ।
નીરાભીમામ્બુકલ્લોલે વિહરામિ સુરેશ્વર ॥ ૪૯॥

તતઃ પ્રહ્લાદનામાગ્રે દૈત્યપુત્રો ભવિષ્યતિ ।
સ નારદ વચસા કરિષ્યતિ તપો મહત્ ॥ ૫૦।
તત્તપસ્તુષ્ટ આરાદ્ધિ નીરાભીમામ્બુસઙ્ગમાત્ ।
સ્થાસ્યે પ્રત્યઙ્મુખો બ્રહ્મન્ દ્વિભુજઃ સિદ્ધિભૂષણઃ ॥ ૫૧॥

તતો માં ભુવિ સલ્લોકા ભજિષ્યન્તિ સુસિદ્ધયે ।
અષ્ટાક્ષરમનુપ્રોક્તં પ્રજાપનવરાભયમ્ ॥ ૫૨॥

સર્વેષામિહભૂતાનાં ભજતાં મામનારતમ્ ।
દદામિ વિપુલાન્ ભોગાનન્તે કૈવલ્યમદ્ભુતમ્ ॥ ૫૩॥

શ્રીશિવ ઉવાચ ।
ઇત્યુક્ત્વા ભગવાન્ વિષ્ણુઃ પ્રણતો બ્રહ્મણાર્ચિતઃ ।
અન્તર્ધાયાત્મનોરૂપં ભુવિ પ્રાદુર્ભવં ગતઃ ॥ ૫૪॥

ઇમં પ્રાદુર્ભવાધ્યાયં યઃ શ્રોષ્યતિ પઠિષ્યતિ ।

સર્વાન્ કામાનવાપ્નોતિ પ્રસાદાન્નૃહરેહરેસ્તુ સઃ ॥ ૫૫॥

@ઇતિ શ્રીપદ્મપુરાણે નૃસિંહપુરમાહાત્મ્યે શ્રીશિવપાર્વતીસંવાદે
શ્રીનૃસિંહપ્રાદુર્ભાવો નામ તૃતીયોઽધ્યાયઃ ।

## ચતુર્થોઽધ્યાયઃ

શ્રીદેવ્યુવાચ ।
પ્રહ્લાદો દૈત્યપુત્રો યો ભવિષ્યતિ મહાતપાઃ ।
તદાખ્યાનં કથં દેવ દેવાવિર્ભાવકારણમ્ ॥ ૧॥

દૈત્યા વૈ રાજસાઃ ક્રૂરાઃ સ્તબ્ધાઃ પણ્ડિતમાનિનઃ ।
તદુદ્ભવેષૂપશમસ્તાપસાનાં સુદુર્લભઃ ॥ ૨॥

શ્રીશિવ ઉવાચ ।
પુરા વૈકુણ્ઠનાથસ્ય દૂતૌ દેવવર્ચિતૌ ।
જયોઽથ વિજયો નામ્ના પ્રસિદ્ધૌ દ્વારપાલકૌ ॥ ૩॥

તયોઃ કદાચિત્કુપિતા બ્રહ્મણો માનસાઃ સુતાઃ ।
શાપં દદુર્નિષિદ્ધા યે હરિસન્દર્શનોત્સુકાઃ ॥ ૪॥

યાતં યુવાં મહાઘોરાં ચાસુરીં યોનિમુલ્બણામ્ ।
ત્રિભિર્જન્મભિરાયાતં પુનઃ પદમનામયમ્ ॥ ૫।
જનિં પ્રાપ્ય દિતિસુતૌ હિરણ્યકશિપુસ્તથા ।
હિરણ્યાક્ષ ઇતિ ખ્યાતૌ ભવિતારૌ સુદુર્જયૌ ॥ ૬॥

હિરણ્યકશિપુઃ કર્તા રાજ્યં ત્રૈલોક્યવન્દિતઃ ।
હર્તા ક્ષોણીં હિરણ્યાક્ષો વરાહેણ હતો રણે ॥ ૭॥

હિરણ્યકશિપુઃ સ્વસ્ય ભ્રાતુઃ પ્રેતસ્ય દુઃખતઃ ।
તપ્ત્વા તપો બહુસમા વિસૃજ્ય સકલાં શ્રિયમ્ ॥ ૮॥

તાવદિન્દ્રોઽમરૈઃ સાર્ધં પ્રભજ્ય તત્પુરીં ખલુ ।
કયાધું તસ્ય દયિતામપહર્તા પુરીં હટાત્ ॥ ૯॥

પ્રજાવતી નારદેન દૃષ્ટા પથિ શુચાતુરા ।
નીયમાના સુરેન્દ્રેણ મુનિના યાચિતા ભવેત્ ॥ ૧૦॥

તસ્યૈ સગર્ભમુદ્દિશ્ય જ્ઞાનં ગુહ્યં સધર્મકમ્ ।

દદાતિ સાદરાત્સૂનોરુદયાય મહૌજસાઃ ॥ ૧૧॥

કાલં નેષ્યત્યાશ્રમેઽસ્ય કાઙ્ક્ષન્તી દિતિજાગમે ।
ભજન્તી મુનિશાર્દૂલં નારદં પિતૃવત્સતી ॥ ૧૨॥

વિધેર્વરાત્સ કાલેન આયાસ્યતિ પુરીં પુનઃ ।
પ્રસોષ્યતિ કયાધુર્વૈ તનુજાંશ્ચતુરઃ પ્રિયે ॥ ૧૩॥

પ્રહ્લાદો ભગવદ્દાસોઽનુગૃહીતો મહર્ષિણા ।
ભવિષ્યતિ સદાકાલે કરિષ્યતિ તપો મહત્ ॥ ૧૪॥

નીરાભીમામ્બુસંયોગે સ્તુવાનો મે પુરોઽર્ભકઃ ।
આયાસ્યતિ કૃપાભારાદુપદિષ્ટો મહર્ષિણા ॥ ૧૫॥

પ્રણતં સગુણં બાલં પ્રહ્લાદં સુન્દરોત્તમમ્ ।
અનુગ્રહીષ્યતિ ગુહ્યેન મન્ત્રેણ મુનિસત્તમઃ ॥ ૧૬॥

કરિષ્યતિ તદા બાલો નૃહરેઃ સ્તવનમિચ્છયા ।
પ્રતિમાં સૈકતીં તસ્ય દ્વિભુજાં સુન્દરાં પ્રિયે ॥ ૧૭॥

તુષ્ટઃ સિંહાનનો દેવઃ પ્રતિમાયાં વિશન્ હરિઃ ।
આવિર્ભવિષ્યતિ હિ મા ભૈષીર્બાલેતિ સંવદન્ ॥ ૧૮॥

સ ઈશાશ્વાસિતઃ પ્રેમ્ણા ગદ્ગદસ્વરસઙ્કુલઃ ।
અશ્રુભિર્મીલિતાક્ષોઽમું સન્નસ્યતિ ભાવતઃ ॥ ૧૯॥

ઉત્થાપ્યાલિઙ્ગ્ય વિશ્વેશઃ કૃપાં તસ્મિન્કરિષ્યતિ ।
સ સ્વામિગાત્રસ્પર્શેણ પૂતો જ્ઞાનમવાપ્સ્યતિ ॥ ૨૦॥

પૂજયિત્વા જગન્નાથં નૃસિંહં વરદેશ્વરમ્ ।
સ્તોષ્યતિ સ્વસ્થભાવેન પરમાનન્દ સુન્દરમ્ ॥ ૨૧॥

પ્રહ્લાદ ઉવાચ ।
જયદેવ જગન્નાથ સર્વજીવનશેવધે ।
સુધાલોકલવામોદ જીવિતાખિલવૃત્તિદ ॥ ૨૨॥

જય માયામહોર્મીણામાકરાનન્દસાગર ।
બ્રહ્માણ્ડબુદ્બુદોન્નદ્ધવિલાસાકુલરોધસ ॥ ૨૩॥

જયાનન્ત મહાભાગ્ય મોક્ષલક્ષ્મીં મહીં કુરુ ।
બ્રહ્મભાવફલોદ્યાનચિદેકામરપાદપ ॥ ૨૪॥

જય કામમહાવલ્લીસઙ્ઘરોપિતસત્ફલૈઃ ।
વિસ્તૃતાવનિસૌરાજ્ય સદેકાનન્દગહ્વર ॥ ૨૫॥

જય જીવમહામોહબન્ધધ્વંસનપણ્ડિત ।
જય દેવ વરેશાન વરદાધીશ સત્પતે ॥ ૨૬॥

જય મોહાતિમાયેશ કાલકાલ નૃસિંહ ભોઃ ।
જય ગ્રસ્તમહામૃત્યો પ્રસીદ કરુણાનિધે ॥ ૨૭॥

ત્વમેકઃ સ્તુતિરીશાનઃ સ્તોતા સ્તુત્યસ્ત્વમીશ્વરઃ ।
ન જાને ત્વત્પરં દેવં ભૂમૌ સદસદાત્મકમ્ ॥ ૨૮॥

શ્રીભગવાનુવાચ ।
પ્રહ્લાદાર્ભકવરશ્રેષ્ઠ વરદોઽહં વરં વૃણુ ।
નમામાલોક્ય ભૂમાનં કોઽપિ શોચિતુમર્હતિ ॥ ૨૯।
પ્રહ્લાદ ઉવાચ ।
કો વરસ્તે વરેશાન દર્શનાદધિકો મતઃ ।
યન્નામશ્રવણાત્પૂતઃ સદ્યઃ સ્યાદ્ ગોવધાદપિ ॥ ૩૦॥

તથાપિ યાચે સન્દિષ્ટઃ પ્રભુણા કિઙ્કરાનુગઃ ।
સ્વામિન્નનેન રૂપેણ વિશાસ્યાં પ્રતિમાં ભુવિ ॥ ૩૧॥

યે ભજન્તિ સમર્ચન્તિ માનવાઃ પ્રણમન્તિ યે ।
તેષામભીષ્ટકામાનાં પૂરકો ભવ સર્વદા ॥ ૩૨॥

એષ એવ વરો દેવ નાન્યં ત્વત્તો વરં વૃણે ।
મન્મનસ્ત્વત્પદદ્વન્દ્વે નિર્દ્વન્દ્વં સ્થિરમસ્તુ ભોઃ ॥ ૩૩॥

શ્રીશિવ ઉવાચ ।
એવં સન્દૃશ્ય ભગવાંસ્તુષ્ટો વક્ષ્યતિ બાલકમ્ ।
પ્રફુલ્લવદનામ્ભોજસ્ફુરત્સ્મિતકલાધરમ્ ॥ ૩૪॥

શ્રીભગવાનુવાચ ।
તથાસ્તુ પ્રતિમાયાં તે સ્થાસ્યામ્યત્ર નિરન્તરમ્ ।
પાલયિષ્યામિ સુજન્દર્શનાદેવ સ્વરૈઃ ॥ ૩૫॥

યે માં દ્વિભુજમીશાનં ત્વદર્ચાકૃતવિષ્ટરમ્ ।
ભજન્તિ ભક્ત્યા પરયા તે વૈ યાન્તિ પરાં ગતિમ્ ॥ ૩૬॥

મામુદ્દિશ્ય સુદૂરસ્થો દદાનો દાનમર્થિનામ્ ।
પૂજાં દધાતિ તસ્યાહં કામાન્ સમ્પૂરયેઽખિલાન્ ॥ ૩૭॥

કિં પુનઃ શ્રદ્ધયા ધીમાન્ મહાયાત્રાં કરોતિ યઃ ।
તસ્ય પુણ્યકૃતઃ પારો નાસ્તિ પુણ્યસ્ય કર્હિચિત્ ॥ ૩૮॥

નૃસિંહદર્શનં લપ્સ્યે યસ્ય બુદ્ધિરિતિ સ્ફુરેત્ ।
સ સર્વપાપવિનિર્મુક્તો ભવેદર્કોદયે તમઃ ॥ ૩૯॥

તતઃ પ્રયાતસ્ય ગૃહાત્પૂજયિત્વેષ્ટદેવતાઃ ।
દેવતાઃ સમ્પ્રસીદન્તિ દદતે વિપુલાન્વરાન્ ॥ ૪૦॥

તતોઽધ્વનિ સમાયાતઃ સ્તુવતો નામરભિર્હરિમ્ ।
પદેપદેઽશ્વમેધસ્ય ફલં તસ્ય વિનિશ્ચિતમ્ ॥ ૪૧॥

મહાપુણ્યભરૈઃ પ્રાપ્ય ક્ષેત્રં મદ્વલ્લભં નરઃ ।
માનુષીતનુરૂપોઽપિ ભવેન્મદ્રૂપસામ્યભાક્ ॥ ૪૨॥

મામાલોક્ય સકૃન્મર્ત્યો વૈકુણ્ઠે લભતે સ્થિતિમ્ ।
માં ભજન્વપુષ્યન્તે સાયુજ્યં લભતે ખલુ ॥ ૪૩॥

યે મામનિશમીશાનં ભજતે શ્રદ્ધયાન્વિતાઃ ।
તે દેવા મર્ત્યરૂપેણ જ્ઞેયાઃ સર્વે ચતુર્ભુજાઃ ॥ ૪૪॥

અજ્ઞો વા જ્ઞાનવાન્બાલો વૃદ્ધોનીચોથચોત્તમઃ ।
નૃસિંહ માં ભજન્મુક્તાઃ સદ્યો યાતિ ગતિં સતામ્ ॥ ૪૫॥

સકૃત્પ્રદક્ષિણીકૃત્ય કૃતાસ્યાદ્ ભૂપ્રદક્ષિણા ।
સકૃન્નત્વા દણ્ડવન્માં ભવેદ્વિબુધસત્તનુઃ ॥ ૪૬॥

દર્શનાત્પુણ્યરૂપોઽસૌ પારમેષ્ઠયં પદં વ્રજેત્ ।
પૂજનાન્મમસારૂપ્યં ભજનાન્મયિ સંસ્થિતિમ્ ॥ ૪૭॥

ત્વમપ્યસુરરાજેન વત્સ દ્રોહિષ્યસે યદા ।
આપ્વિમુક્તયે બાલ તદા મત્સ્મરણં કુરુ ॥ ૪૮॥

યાતનાઃ પ્રશમં સર્વા યાસ્યન્તિ મદનુગ્રહાત્ ।
પિતાપિ મમ સંસ્પર્શાત્પૂતો યાસ્યતિ મત્પદમ્ ॥ ૪૯॥

યદાયદા ધ્યાયસિ મામધીશં ચેતઃ સમાધાય મદઙ્ઘ્રિપદ્મે ।

તદાતદા તત્ર હિ તત્ર સિદ્ધસ્તિષ્ઠામિ તેઽગ્રે સ્મૃતિમાત્રતોહિ ॥ ૫૦॥

એતાવદભયં દત્વા ચિન્મયો દૃશ્યરૂપધૃક્ ।
વાલુકાપ્રતિમાયાં વૈ તિષ્ઠેત્તત્ર નિરન્તરમ્ ॥ ૫૧॥

પ્રહ્લાદોઽપિતમીશાનં ત્રિઃ પરિક્રમ્ય સન્નતઃ ।
પૂર્ણાર્થઃ પુરમાગત્ય ભવિષ્યતિ જડાઙ્ગવત્ ॥ ૫૨॥

તં વિરુધ્ય પિતા તસ્ય ક્ષયમેષ્યતિ તત્ક્ષણાત્ ।
ઉદીર્ણવક્ષઃસ્થલો ભૂત્વા નખરૈર્નૃહરેસ્તદા ॥ ૫૩।
ઇતિ તે કથિતં દેવિ પ્રહ્લાદાખ્યાનમુત્તમમ્ ।
પઠતાં શ ૃણ્વતાં નૃણાં પાપઘ્નં મઙ્ગલાર્થદમ્ ॥ ૫૪॥

ય એતત્ પઠતિ પ્રાજ્ઞઃ શ ૃણોત્યવહિતો નરઃ ।
સ પ્રસાદં હરેર્યાતિ પ્રિયઃ પ્રહ્લાદવદ્ભવેત્ ॥ ૫૫॥

પ્રહ્લાદેન કૃતં સ્તોત્રં યઃ પઠેત્પ્રાતરન્વહમ્ ।
તસ્ય મન્ત્રભવા સિદ્ધિર્માસેનસ્યાત્પરાર્થદા ॥ ૫૬॥

અન્નં યશઃ સુતાન્ કામાન્ પુણ્યમોક્ષં સનાતનમ્ ।
પ્રભાવાદસ્ય સ્તોત્રસ્ય મર્ત્યો વૈ પ્રાપ્નુયાત્ સદા ॥ ૫૭॥

ઇતિ તે કથિતો દેવિ ક્ષેત્રાવિર્ભાવકો ભુવિ ।
અધુના તીર્થમાહાત્મ્યં શ ૃણુ સિદ્ધિપ્રદોત્તમમ્ ॥ ૫૮॥

@ઇતિ શ્રીપદ્મપુરાણે નૃસિંહપુરમાહાત્મ્યે શ્રીશિવપાર્વતીસંવાદે
ક્ષેત્રાવિર્ભાવકોનામ ચતુર્થોઽધ્યાયઃ ।

## પઞ્ચમોઽધ્યાયઃ

શ્રીશિવ ઉવાચ ।
દેવસ્ય વામભાગેઽસ્તિ લક્ષ્મીતીર્થમનુત્તમમ્ ।
તસ્ય પ્રમાણં વ્યાયામઃ શતચાપમિદં વિદુઃ ॥ ૧॥

પુરા લક્ષ્મ્યાતપસ્તપ્તં તત્ર દિવ્યં સમાશતમ્ ।
ચાઞ્ચલ્યદોષશાન્ત્યર્થં પ્રસાદાન્નૃહરેઃ પ્રભોઃ ॥ ૨॥

તતઃ પ્રસન્નો ભગવાંસ્તસ્યૈ વરમદાચ્છુભમ્ ।
પ્રિયે ખિન્નાસિ તપસા દુશ્ચરેણાપિ યોગિભિઃ ॥ ૩॥

તવાભીષ્ટં દદામ્યાશુ વરં વરય મઙ્ગલે ।
ચાઞ્ચલ્યમયિ તે નાસ્તુ સ્વસ્થા તિષ્ઠા વક્ષસિ ॥ ૪॥

ભાર્ગવે વાસરે યે ત્વામત્રસ્તોષ્યન્તિ ભક્તિતઃ ।
દેવીસૂક્તેન વા મન્ત્રૈઃ પૌરાણૈરાગમોદ્ભવૈઃ ॥ ૫॥

તેષાં હરામ્યહં શશ્વદ્વિપદઃ સમ્પદોઽર્પયે ।
મોક્ષલક્ષ્મ્યા વિશેષેણ પાત્રં તે સ્યુર્ન સંશયઃ ॥ ૬॥

ઇત્યુક્ત્વાલિઙ્ગ્ય કમલાં તૂષ્ણીમાસીચ્છુચિસ્મિતઃ ।
પ્રતીક્ષમાણઃ પદ્માસ્ય પ્રીતોઽભૂદ્વચસા તદા ॥ ૭॥

લક્ષ્મી ઉવાચ ।
સર્વજ્ઞ કરુણામ્ભોધે નાથ સિંહાનનાચ્યુત ।
વરદશ્રેષ્ઠ યદિ પ્રીતો દેહિ મે યદભીપ્સિતમ્ ॥ ૮॥

અસ્મિંસ્તીર્થે કૃતસ્નાનદાનતર્પણભોજનાઃ ।
તવ મન્ત્રજપાસક્તાઃ સર્વે સન્તુ મહોદયાઃ ॥ ૯॥

નિત્યં ત્વદઙ્કરમણીં યે સ્મરન્તિ મહાલસામ્ ।
તેષામનન્યમનસાં મુક્તિઃ કરગતા ભવેત્ ॥ ૧૦॥

ભૂયાદત્ર મહાઁલ્લાભઃ સર્વદા સિદ્ધિસમ્ભવઃ ।
યોગમન્ત્રતપોદાનવ્રતાનાં ત્વત્પ્રસાદતઃ ॥ ૧૧॥

શ્રીભગવાનુવાચ ।
એવમસ્તુ વિશાલાક્ષિ તીર્થેઽસ્મિન્સર્વદા પ્રિયે ।
સદા સ્થાસ્યામિ ભવતીમઙ્કેકૃત્વા વરાનને ॥ ૧૨॥

સિદ્ધયઃ સન્તુ યોગાદ્યા મોક્ષસિદ્ધિરપિ પ્રિયે ।
મુક્તિતીર્થં સિદ્ધિતીર્થં લક્ષ્મીતીર્થં મનોહરમ્ ॥ ૧૩॥

નૃસિંહતીર્થમિત્યાખ્યા ભૂયાદસ્ય વરાનને ।
અષ્ટપીઠાનિ પરિતો ભવિષ્યન્ત્યસ્ય ગુપ્તયે ॥ ૧૪॥

પૂર્વે કોલ્હાપુરં નામ કામાક્ષં નામ દક્ષિણે ।
પશ્ચિમે વિરજં પીઠં કામરૂપં તથોત્તરે ॥ ૧૫॥

ત્રિકૂટં હિઙ્ગુલાસિન્ધુજાલન્દરમિતિસ્ફુટમ્ ।
કોણેષુ તાનિ સ્થાસ્યન્તિ નાનાસિદ્ધિપ્રદાન્યલમ્ ॥ ૧૬॥

કલૌ કલુષબુદ્ધીનાં નૂનં ગૂઢં ભવિષ્યતિ ।
લક્ષ્મીતીર્થસ્યમહિમા ન કેનાપિ ક્ષમોઽવિતુમ્ ॥ ૧૭॥

અત્રાહં ત્વં સદા ગૂઢં તિષ્ઠામો યોગસિદ્ધયે ।
લક્ષ્મીનૃસિંહમનુના પૂજિતૌ સંસ્તુતૌ નતૌ ॥ ૧૮॥

શ્રીશિવ ઉવાચ ।
ઇત્યુક્ત્વા સરમો દેવસ્તત્રૈવાન્તરધીયત ।
તદારભ્યાભવત્તીર્થં સર્વેષાં સર્વસિદ્ધિદમ્ ॥ ૧૯॥

કાલેન નીરા સંયાતા તસ્યોપરિ શુચિસ્મિતે ।
તતો નારાયણં નામ તીર્થં વિદ્વદ્ભિરુચ્યતે ॥ ૨૦।
કદાચિદત્ર સંયાતો વણિક્કશ્ચિદ્ધની મહાન્ ।
સ્નાત્વા વિચારયામાસ કુતો મે સમ્પદીદૃશી ॥ ૨૧॥

ન મયારાધિતઃ શમ્ભુર્ન તયા તર્પિતા દ્વિજાઃ ।
ન મયા તોષિતો વિષ્ણુદીનનાથાઙ્ધપાલનાત્ ॥ ૨૨॥

ન તીર્થેષુ ન પાત્રેષુ ન પર્વસુ કદાચન ।
કાકિણીમાત્રમપ્યાહો દત્તમન્યસ્ય કા કથા ॥ ૨૩॥

ઇત્થં ચિન્તાતુરસ્યાસ્ય પુરતઃ કશ્ચિદાગતઃ ।
સિદ્ધોઽવધૂતો દિગ્વાસા દીપ્તનેત્રો મહાપ્રભઃ ॥ ૨૪॥

તં પ્રણમ્યાદરેણાસૌ પૃષ્ટવાન્ચદ્ધિચિન્તિતમ્ ।
બ્રૂહિ યોગિન્ કથં સમ્પજ્જાતા મે ધનદોપમા ॥ ૨૫॥

પ્રહસ્યાહ મહાયોગી કા તે સમ્પદ્ વિવર્ણય ।
સ પ્રોવાચ મહાભાગ શ્રૂયતાં યદિ રોચતે ॥ ૨૬॥

એતેઽષ્ટકોટયોઽર્થાનાં કોટયોઽશ્વતરીગણાઃ ।
મહામરકતા નીલા ગારુડાસ્તાદૃશા મમ ॥ ૨૭॥

મુક્તાફલાનાં નવતીઃ કોટીનાં મદ્ગૃહે તથા ।
સત્યેવં મણયોઽનન્તા વાસસાં પર્વતા ઇમે ॥ ૨૮॥

ધાતૂનાં શિખરાણ્યાહ દશલક્ષં ગૃહે મમ ।
તાદૃશાઃ કોટિગુણિતાઃ સમ્ભારાઃ સન્તિ હે પ્રભો ॥ ૨૯॥ ।

ધાન્યક્ષેત્રગજાનીકસ્યન્દનાદિભિરુજ્જવલાઃ ।

સર્વદેશેષ્વહં માન્યો ધનાઢ્યાનાં મહત્તમઃ ॥ ૩૦॥

કેન પુણ્યેન સઞ્જાતો ન જાનામ્યત્રકારણમ્ ।
સ પ્રોવાચ મહાભાગ કથ્યતાં કૃપયા હિ તત્ ॥ ૩૧॥

અવધૂત ઉવાચ ।
પુરા ત્વં યાચકો દીનો વિપ્રો જન્મનિ સપ્તમે ।
યાવજ્જન્મ પરાન્નેન તુષ્ટો લુબ્ધોઽતિશોચ્યધીઃ ॥ ૩૨॥

સ કદાચિચ્ચરન્નુર્વીં નીરાતીરમુપાગતઃ ।
એકાદશ્યાં ફલાહારમપિનો લબ્ધવાનિહ ॥ ૩૩॥

ક્ષુધાતુરસ્ય દીનસ્ય રાત્રિરન્નૈકકાઙ્ક્ષિણઃ ।
જાગરેણ વ્યતીતા સા ભ્રમતો દેવમન્દિરે ॥ ૩૪॥

પ્રસઙ્ગાદ્દૈવતો રાત્રૌ પૂજાનરહરેરલમ્ ।
ભક્તૈઃ કૃતાલોકિતા તે નામાનિ શૃણ્વતો હરેઃ ॥ ૩૫॥

પ્રભાતે સઙ્ગમે સ્નાત્વા લક્ષ્મીતીર્થમુપાગતઃ ।
પલ્લવસ્થાન્યવાન્પ્રાદાઃ કસ્મૈચિદ્ દ્વિજલિઙ્ગિને ।
તતઃ કાલવશં યાતઃ પ્રાપિતો યમસન્નિધૌ ।
તાવદ્યમેન પ્રયતા ગચ્છ ગચ્છેતિ ભાષિતઃ ॥ ૩૭॥

તદૈવ દક્ષિણે દેશે દ્રાવિડેષુ નરેશ્વરઃ ।
જાતસ્ત્વં સર્વભોગાઢ્યઃ પઞ્ચવારં સુજન્મસુ ॥ ૩૮॥

પઞ્ચપ્રદક્ષિણા રાત્રૌ ભ્રમતા વિહિતાસ્ત્વયા ।
તેન પુણ્યેન રાજેન્દ્રઃ પઞ્ચજન્મનિ ભોગવાન્ ॥ ૩૯॥

તેન ગન્તાસિ વૈકુણ્ઠં યતો નાવર્તનં પુનઃ ।
અધુનોપોષણં યત્તે કૃતમેકાદશીદિને ॥ ૪૦॥

પૂજાદર્શનપુણ્યેન પ્રાપ્તવાનદ્ય સન્મતિમ્ ।
યવદાનેન સમ્પત્તિં ગતોઽસિ વણિજામ્પતે ॥ ૪૧॥

અત્રાણવપિ હિ યત્ કિઞ્ચિત્સુકૃતદુષ્કૃતં કૃતમ્ ।
ન તસ્યાન્તોઽસ્તિ કલ્પાન્તે યત્રોદાહરણં ભવાન્ ॥ ૪૨॥

શ્રીશિવ ઉવાચ ।
ઇત્યુક્ત્વા સ તુ યોગીન્દ્રો દત્તાત્રેયો મહામુનિઃ ।

તત્રૈવાન્તર્દધે સોઽપિ વિસ્મયં પરમં ગતઃ ॥ ૪૩॥

દત્વા સર્વસ્વમાર્યભ્યો યજ્ઞૈરિષ્ટ્વા સુદક્ષિણૈઃ ।
તત્રૈવ સંસ્થિતો નિન્યે શેષમાયુરકિઞ્ચનઃ ॥ ૪૪॥

જિતેન્દ્રિયો જિતશ્વાસો ધ્યાયન્નરહરિં હૃદિ ।
દદર્શાગ્રે સ્થિતં દિવ્યં વિમાનં તૈજસં મહત્ ॥ ૪૫॥

સદ્યશ્ચતુર્ભુજોપેતો દિવ્યાલઙ્કારભૂષણઃ ।
દિવ્યવેષો વિમાનં તદારુરોહ મુદાયુતઃ ॥ ૪૬॥

સ વૈકુણ્ઠે હરેર્દાસો વિષ્ણુદાસ ઇતીરિતઃ ।
અદ્યાપિ રાજતે શ્રીમાન્ વિષ્ણુચિન્હૈરલઙ્કૃતઃ ॥ ૪૭॥

ઇતિ સૂત્રેણ મહિમા લક્ષ્મીતીર્થસ્ય વર્ણિતઃ ।
અસ્ય સ્મરણમાત્રેણ મહાપાપૈઃ પ્રમુચ્યતે ॥ ૪૮॥

@ઇતિ શ્રીપદ્મપુરાણે નૃસિંહપુરમાહાત્મ્યે શ્રીશિવપાર્વતીસંવાદે
શ્રીલક્ષ્મીતીર્થપ્રભાવવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ।

## ષષ્ઠોઽધ્યાયઃ

દેવ્યુવાચ ।
લક્ષ્મીતીર્થસ્ય મહિમા શ્રુતો દેવ મુખાત્તવ ।
અન્યેષાં તીર્થવર્યાણાં માહાત્મ્યં વક્તુમર્હસિ ॥ ૧॥

શ્રીશિવ ઉવાચ ।
લક્ષ્મીતીર્થાત્ પૃષ્ઠભાગે ધનુષાં પઞ્ચવિંશતિઃ ।
પદ્મતીર્થં મહાપુણ્યં સર્વેષાં સિદ્ધિદાયકમ્ ॥ ૨॥

ભગવદ્દર્શનાનન્દવિકલાયાઃ કરાગ્રતઃ ।
પદ્માયા ગલિતં પદ્મં પદ્મતીર્થં તતો વિદુઃ ॥ ૩॥

કુબેરો યત્ર સમ્પ્રાપ્તો યતઃ પદ્મનિધિ પુરા ।
અદ્યાપિ પદ્મતીર્થસ્ય સેવકા ન દરિદ્રિણઃ ॥ ૪॥

વામે પદ્મનિધેઃ પૂર્વે ભાગે શઙ્ખનિધિઃ સ્થિતઃ ।
ગદાતીર્થં પવિત્રં ચ વિદ્યતે શ ૃણુ પાર્વતિ ॥ ૫।
ચતુર્ણામિહતીર્થાનાં મહિમા દુર્લભઃ કલૌ ।

સ્મરણાત્સર્વપાપઘ્નો દર્શનાન્મુક્તિદો મતઃ ॥ ૬॥

દેવસ્ય વામે પુરતો ગદાતીર્થમનુત્તમમ્ ।
ગદાધરો યત્ર દેવો ગયાપુણ્યં દદાત્યસૌ ॥ ૭॥

નીરાયાં લક્ષ્મીતીર્થાત્ ધનુષાં પઞ્ચવિંશતિઃ ।
ગદાતીર્થં ગયાયાસ્તુ કોટિશ્રાદ્ધફલપ્રદમ્ ॥ ૮॥

પિતરઃ સર્વદેચ્છન્તિ ગદાતીર્થોદકક્રિયામ્ ।
શ્રાદ્ધસ્યાકલ્પિકી તૃપ્તિરાકલ્પં તીર્થં હિ સ્મૃતમ્ ॥ ૯॥

ગદાતીર્થે કૃતસ્નાનતર્પણશ્રાદ્ધદાનતઃ ।
મનુજો લભતે સિદ્ધિં પ્રસાદાન્નૃહરેઃ પ્રિયે ॥ ૧૦॥

પુરા કશ્ચિદ્ દ્વિજશ્રેષ્ઠો દાક્ષિણાત્યઃ શુચિવ્રતઃ ।
પિતૃણાં નિષ્કૃતિ પ્રેપ્સુર્ગચ્છસ્તીર્થ વ્રતી ગયામ્ ॥ ૧૧॥

આગતો નીરયા યત્ર ગદાતીર્થ સુસંસ્કૃતમ્ ।
કૃતવાન્ સ્નાનદાનાદિ શ્ ૃદ્ધાયુક્તઃ પિતૃવ્રતઃ ॥ ૧૨॥

તાવદ્દર્શ દિવ્યાઙ્ગાન્ વિમાનૈશ્ચરતો દિવમ્ ।
સ્વપિતૄન્પરિસન્તૃપ્તાન્ સાધુ સાધ્વિતિ વાદિનઃ ॥ ૧૩॥

ત ઊચુર્બ્રાહ્મણવરં પુત્ર તે તારિતા વયમ્ ।
ગદાતીર્થપ્રભાવેણ ગચ્છામો હરિમન્દિરમ્ ॥ ૧૫॥

ગૃહં ત્વં ગચ્છ તીર્થાનિ કૃતાનિ નો વિનિષ્કૃતિઃ ।
અધુના પ્રયોજનં નાસ્તિ વત્સ તીર્થાટનસ્ય તે ॥ ૧૫॥

શ્રુત્વા પિતૃવચોઽભીક્ષ્ણં વિસ્મિતોઽભૂદ્ દ્વિજોત્તમઃ ।
ગદાતીર્થે ચિરં સ્થિત્વા દેહાન્તે હરિમાપ સઃ ॥ ૧૬॥

(??)પશ્ચિમતો ધનુષામેકવિંશતિઃ ।
પિશાચમોચનં નામ તીર્થં પાવનમસ્તિ હિ ॥ ૧૭॥

તત્ર કિઞ્ચિત્પુરાવૃત્તં દેવિ તે કથયામ્યહમ્ ।
વિષ્ણુશર્મેતિ વિપ્રોઽભૂદથર્વણ ઇતિ સ્મૃતઃ ॥ ૧૮॥

સ્મરન્નરહરિં નિત્યં સદાચારો દયાન્વિતઃ ।
કદાચિત્કાશિકાં દ્રષ્ટુમીયુષાં સહચારિણામ્ ॥ ૧૯॥

સઙ્ગાદ્ગચ્છન્પથિ શ્રાન્તો વિન્ધ્યાદ્રેરધરે સ્થિતઃ ।
તાવદગ્રેઽભવત્તસ્ય ધૂમરાશિર્મહોલ્બણઃ ॥ ૨૦॥

ચક્ષુષા કેવલં વૃક્ષાનુત્તુઙ્ગાનપિ યો દહન્ ।
તન્મધ્યે દદૃશે તેન વિપ્રેણ સહસા તદા ॥ ૨૧॥

અસ્થિમાત્રૈકસઙ્ચ્છન્નો દીર્ઘગ્રીવા ભયાનકઃ ।
પિઙ્ગશ્મશ્રુ ધૂમ્રત્વચઃ પ્રાણિનાં પ્રાણહારકઃ ॥ ૨૨॥

બહુભિઃ પરિનૃત્યદ્ભિઃ પરીતઃ પ્રેતવૃન્દકૈઃ ।
ભીષયન્ પથિકાન્ ખાદન્ વિપ્રાગ્રેઽવસ્થિતઃ ખલુ ॥ ૨૩॥

વિષ્ણુશર્મા નૃસિંહેતિ જગદોચ્ચૈઃ સહાનુગૈઃ ।
સ તત્તીર્થોદકં તેષામુપરિ પ્રાક્ષિપત્તદા ॥ ૨૪॥

તજ્જલસ્પર્શમાત્રેણ નૃસિંહનામકીર્તનાત્ ।
સદ્યો દિવ્યતનુર્ભૂત્વા વિમાનસ્થોઽભવન્મુદા ॥ ૨૫॥

પ્રેત ઉવાચ ।
મોચિતા ભવતા વિપ્ર તીર્થામ્બુસ્પર્શનાદ્વયમ્ ।
ગચ્છામો વિષ્ણુભવનં પ્રસાદાત્તવ પાવનમ્ ॥ ૨૬॥

દિવ્યં જ્ઞાનં મમોત્પન્નં નૃસિંહાખ્યાસ્મૃતેર્વરમ્ ।
ઇદાનીં પૃચ્છ યદ્વાઞ્છા સર્વં તે કથયામ્યહમ્ ॥ ૨૭॥

વિષ્ણુશર્મોવાચ ।
કસ્ત્વં પ્રેતવપુઃ પાપાત્કસ્માજ્જાતમિદં પ્રભો ।
જલસ્ય કસ્ય સંસ્પર્શાદ્ ગતોઽસિ હરિમન્દિરમ્ ॥ ૨૮॥

પ્રેત ઉવાચ ।
પુરાહં રાજવર્યસ્ય ભોજનામ્નો યશસ્વિનઃ ।
પુરોહિતોઽભવં વિપ્રો વેદવેદાઙ્ગપારગઃ ॥ ૨૯॥

એતે સહાય્યકા વિપ્રા મમ શાસ્ત્રવિશારદાઃ ।
એતૈર્મયા પરાભૂતા બહવઃ પણ્ડિતોત્તમાઃ ॥ ૩૦॥

છલેન પરિહારેણ વૃત્ત્યા તે પરિહારિતઃ ।
રાજ્ઞા ન પૂજિતાઃ કેચિન્મયા તૃણસમાઃ કૃતાઃ ॥ ૩૧॥

દાનવ્રતતપોહોમૈરર્ચયિત્વા ધનં બહુ ।

અદાન્તા ઉગ્રકર્માણો બ્રહ્મદ્વેષેણ સર્વદા ॥ ૩૨॥

પ્રાપ્તા પાપીયસીં યોનિઃ પૈશાચીં સ્મૃતિનાશિનીમ્ ।
ભવતા મોચિતા હ્યદ્ય જલસ્પર્શેણ સન્મતે ॥ ૩૩॥

વિષ્ણુશર્મોવાચ ।
કુતોઽસ્ય મહિમા સાધો જલસ્ય પ્રેતમોચને ।
ત્વર્ણય યદિ કૃપા મયિ તે સ્યાદલૌકિકી ॥ ૩૪॥

પ્રેત ઉવાચ ।
સાધો ય એષ કલશો હસ્તે તે વર્તતેઽધુના ।
પિશાચમોચનજલસ્યૈતસ્મિન્નાર્દ્રતાભવત્ ॥ ૩૫॥

તત્સઙ્ગાત્પાવનં વારિ બભૂવ કલશેસ્થિતમ્ ।
યેન પ્રેતત્વમુત્સૃજ્ય પ્રાપ્તા દિવ્યાં ગતિં દ્વિજ ॥ ૩૬॥

ગદાતીર્થાગ્રતો દીપ્તં વર્તતે તીર્થમુત્તમમ્ ।
પિશાચમોચનં નામ યેન સમ્મોચિતા વયમ્ ॥ ૩૭॥

પિશાચમોચને સ્નાત્વા તર્પયિત્વા પિતૄન્ દ્વિજાન્ ।
ઉદ્ધરેન્નરકામ્ભોધેઃ પિતૄન્ પ્રેતાંશ્ચ પૂર્વજાન્ ॥ ૩૮॥

નિત્યં પરિચરેદ્યસ્તુ તીર્થં પૈશાચમોચનમ્ ।
તસ્યાજ્ઞાનપિશાચત્વં સદ્યો નશ્યતિ બન્ધકૃત્ ॥ ૩૯॥

પુરાત્ર હરિણા દત્તો લોકાનાં હિતકામ્યયા ।
પિશાચમોચને મુક્તિઃ વરઃ કામફલપ્રદઃ ॥ ૪૦॥

અસંસ્કૃતાઃ સંસ્કૃતાસ્તુ સંસ્કૃતા મોક્ષભાજનાઃ ।
ન તથાન્યચ્છોભતે તીર્થં યથેદં તીર્થમુત્તમમ્ ॥ ૪૧॥

અત્રાહં ગુરુરૂપેણ સ્થિત્વા સ્નાનાર્દ્રવર્ષ્મણામ્ ।
ચિત્તે દિશામિ તજ્જ્ઞાનં યેન બન્ધાદ્વિમુચ્યતે ॥ ૪૨॥

દૂરસ્થેનાપિ પાપેન સ્તુતિઃ પૈશાચમોચિની ।
શ્રાવ્યા શ્ૃદ્ધાન્વિતો ભૂત્વા મત્કૃતા મોક્ષપ્રાપ્તયે ॥ ૪૩॥

ઇત્યુક્ત્વા નૃહરિસ્તત્ર બભૂવાન્તર્હિતો દ્વિજ ।
નીરા તસ્યોપરિગતા પુણ્યા યા નૃહરેસ્તનુઃ ॥ ૪૪॥

અધુના ત્વરં તીર્થં તીર્થાનામુત્તમં ખલુ ।

વર્તન્તે દિવ્યવપુષો યત્ર સ્નાત્વા દ્વિજોત્તમ ॥ ૪૫॥

શ્રીશિવ ઉવાચ ।
શ્રુત્વા પ્રેતસ્ય વચનં દૃષ્ટ્વા ગતિમનુત્તમામ્ ।
વિષ્ણુશર્મા વિસ્મિતોઽગાત્પુનર્નીરાતટં શુચિઃ ॥ ૪૬॥

પિશાચમોચને સ્થિત્વા સ્તુત્વા નરહરિં તદા ।
મુક્તોઽભવ્વિષ્ણુશર્મા ભવબન્ધાત્તદા પ્રિયે ॥ ૪૭॥

પિશાચમોચનાખ્યાનં યે શ‍ૃણ્વન્તિ નરોત્તમાઃ ।
તેઽપિ મુક્તા ભવોદ્બન્ધાદ્યાન્તિ વિષ્ણોઃ પરં પદમ્ ॥ ૪૮॥

@ઇતિ શ્રીપદ્મપુરાણે નૃસિંહપુરમાહાત્મ્યે શ્રીશિવપાર્વતીસંવાદે
પિશાચમોચનતીર્થવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ।

## સપ્તમોઽધ્યાયઃ

દેવ્યુવાચ ।
પિશાચમોચનાખ્યાનં શ્રુતં પરમમદ્ભુતમ્ ।
ઇદાનીં શ્રોતુમિચ્છામિ સ્તુતિં પૈશાચમોચિનીમ્ ॥ ૧॥

હરિઃ કસ્માદિમાં પુણ્યાં કૃતવાન્ સ્તુતિમુત્તમામ્ ।
ત્વર્ણય મહાદેવ યયા બન્ધાદ્ વિમુચ્યતે ॥ ૨॥

શ્રીશિવ ઉવાચ ।
પુરા કલ્પાદિસમયે વિષ્ણુર્નાભેરભૂદજઃ ।
ચતુર્યુસહસ્રાન્તે તસ્ય નિદ્રામુપેયુષઃ ॥ ૩॥

વિષ્ણુકર્ણમલોદ્ભૂતૌ સઞ્જાતૌ મધુકૈટભૌ ।
તાભ્યામુપાહૃતાઃ સર્વે વેદા વિશ્વસ્ય સાધનમ્ ॥ ૪॥

કાલે સિસૃક્ષાત્તાવદ્ વેદા અસ્મરણં ગતાઃ ।
તતઃ પિશાચવજ્જજ્ઞે બ્રહ્મા દાનવભીતિતઃ ॥ ૫॥

તસ્ય નારાયણોઽનન્તો દિદેશ સ્તોત્રમુત્તમમ્ ।
બ્રહ્મણઃ પુરતો સ્થિત્વા મન્ત્રરાજાત્મકં શિવમ્ ॥ ૬॥

તેન પ્રબુદ્ધો ભગવાન્ બ્રહ્મા લોકપિતામહઃ ।
અસ્મરદ્વેદમખિલં જ્ઞાનં યત્પૌર્વકાલિકમ્ ॥ ૭॥

તદહં તેઽભિધાસ્યામિ નારાયણવરાદિદમ્ ।
શ્રુતં બ્રહ્મમુખાદ્દેવિ સર્વાર્થાનાં પ્રસાદકમ્ ॥ ૮॥

વિશુદ્ધમજમાનન્દમેકમાત્રમખણ્ડિતમ્ ।
સચ્ચિન્માત્રં પરં શાન્તં યત્તદ્ બ્રહ્મ નમામ્યહમ્ ॥ ૯॥

યદ્ભાસા નિખિલં ભાતિ યસ્યનાન્યત્પ્રકાશકમ્ ।
પુરાણમવ્યયં જ્યોતિ તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૦॥

યદેકં સર્વરૂપેષુ પ્રતિરૂપતયા સ્થિતમ્ ।
જ્યોતિર્યથોદપાત્રેષુ તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૧॥

યદન્તઃ સર્વભૂતાનાં યત્તદ્રૂપમબાધિતમ્ ।
મેવાભરણાદીનાં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૨॥

યદેકં સર્વભાવાનાં નિરન્તરમદૂષિતમ્ ।
ચિન્માત્રં નિષ્કલં પૂર્ણં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૩॥

યેનાર્થાન્ ભજતે જન્તુરન્દ્રિયેષુ મનસ્યપિ ।
નિરહઙ્કારમાનન્દં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૪॥

યન્મનો મનસાં પ્રાણઃ પ્રાણાનામિદ્રિયં વરમ્ ।
સર્વાત્મકમખણ્ડં સત્તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૫॥

યન્નામગુણરૂપાદ્યૈર્વિચિત્રમપિ સર્વગમ્ ।
અજ્ઞેયં પશુબુદ્ધીનાં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૬॥

યસ્માદુદેતિ સ્વિશ્વં યેન જીવતિ વર્ધતે ।
યસ્મિન્પ્રલીયતે સર્વં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૭॥

યતો વાગાદયો ભાવા ઉત્થિતાઃ સ્વસ્વકર્મસુ ।
પ્રવર્તતે સાક્ષિરૂપાત્તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૮॥

સકલં નિષ્કલં વ્યોમ માયાતીતં નિરઞ્જનમ્ ।
અસ્તિ નાસ્તિ દ્વયાતીતં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૧૯॥

યદ્ ગ્રાસકં ગ્રાસકાણાં વીરાણાં ચ વિવર્ધનમ્ ।
વ્યાપકં વ્યાપકાનાં ચ તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૨૦॥

યજ્જ્વાલયતિ કાલાદ્યાંસ્તમો યેન પ્રકાશતે ।
મહાજ્વાલાતમોરૂપં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૨૧॥

યત્સર્વતો વદનવત્સર્વતઃ કરપાચ્છિરઃ ।
સર્વતો નયનં શ્રોત્રં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૨૨॥

યદ્વિચારવતાં નૃણાં બન્ધોઽનાદિતમોભવઃ ।
સદ્યો નશ્યતિ શારીરસ્તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૨૩॥

યસ્યાજ્ઞયાનિલાર્કેદુર્મૃત્યુવન્હિગ્રહાદયઃ ।
સર્વે કર્મસુ વર્તંતે તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૨૪॥

યન્નામ મઙ્ગલતમં મઙ્ગલાનામનુત્તમમ્ ।
સ્તુતિભિસ્તૂયતે વેદૈસ્તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૨૫।
યસ્યાત્મત્તાં વિન્દાં મૃત્યુરનાદિમ્રિયતેક્ષણાત્ ।
મૃત્યુમારણમાપૂર્ણં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૨૬॥

નિષિધ્ય સર્વ લોકેઽસ્મિન્યચ્છેષમુપલભ્યતે ।
સત્તામાત્રમનિર્દેશ્યં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૨૭॥

પૂર્ણમન્તર્બહિઃ પૂર્ણં યેન પૂર્ણેન પૂર્યતે ।
પૂર્ણસ્ય પૂર્ણમાકાશં તદ્ધિ બ્રહ્મ નમામ્યહમ્ ॥ ૨૮॥

એતદ્દેવિ મહાસ્તોત્રં મહાપૈશાચમોચનમ્ ।
યત્ર કુત્ર સ્મરન્ જન્તુર્બ્રહ્મસાયુજ્યમશ્નુતે ॥ ૨૯॥

કૈવલ્યાદ્યખિલાર્થાનામિદમેવેહકારણમ્ ।
નૃહરેર્મન્ત્રરાજસ્ય સ્તોત્રં પૈશાચમોચનમ્ ॥ ૩૦॥

એતત્પઠણતો યાતિ મુક્તિમાત્યન્તિકીં નરઃ ।
કિં પુનઃ સર્વભોગાદ્યાંસ્તુચ્છ્ય્ દીનેષુસમ્મતાન્ ॥ ૩૧॥

એતત્પ્રસઙ્ગતઃ પ્રોક્તં સ્તોત્રં તેઽભીષ્ટસિદ્ધિદમ્ ।
અધુના શ ृણુ વક્ષ્યાભિ શેષતીર્થાનિ સૂત્રતઃ ॥ ૩૨॥

પિશાચમોચનાત્પશ્ચાત્તીર્થં ગારુડસંજ્ઞિતમ્ ।
ગરુડેન તપસ્તપ્ત્વા યત્ર લબ્ધં મહદ્બલમ્ ॥ ૩૩॥

જિત્વામરેશ્વરં સઙ્ખ્યે સુધાં હૃત્વા બલાત્તતઃ ।
વિમુચ્ય માતરં દાસ્યાદ્ વિનતામજિતોઽભવત્ ॥ ૩૪॥

તોષયિત્વા રણે વિષ્ણું તેનાયં યાચિતો મુદા ।

વાહનન્ત્વ ગતો જગ્ધ્વા પન્નગાન્કોટિશોઽભિતઃ ॥ ૩૫॥

તત્તીર્થે સ્નાનદાનેન સર્વવેદસમુદ્ભવમ્ ।
પુણ્યં પ્રાપ્નોતિ કલ્યાણિ યત્ર કુત્ર મૃતોઽપિ સઃ ॥ ૩૬॥

તતોનૃસિંહતીર્થં વે ક્રોશમાત્રં વરાનને ।
હિરણ્યકશિપું હત્વા યત્ર દેવો વ્યવસ્થિતઃ ॥ ૩૭॥

તત્તીર્થસ્ય પ્રભાવો હિ મયા વક્તું ન શક્યતે ।
સર્વાર્થદં મોક્ષબીજં તીર્થં તત્પરમં પ્રિયે ॥ ૩૮॥

શ્રીમન્નૃસિંહઃ સમ્પૂજ્યો ભક્તવિઘ્નૌઘનાશનઃ ।
નાનોપહારૈઃ ક્ષેત્રસ્ય મહાભીત્યુપશાન્તયે ॥ ૩૯॥

એતાનિ તીર્થમુખ્યાનિ વામે દેવસ્ય ચાગ્રતઃ ।
એકૈકસ્મિન્ વસન્તીહ કોટિશસ્તીર્થરાશયઃ ॥ ૪૦॥

ઇન્દ્રતીર્થં તતઃપુણ્યમન્વિતં કોટિતીર્થકૈઃ ।
હરિર્નાયાસતો યત્ર રરક્ષેદ્રં હિ પાતકાત્ ॥ ૪૧॥

શ્વેતતીર્થં ચ તસ્યાગ્રે હંસતીર્થં વદન્ત્યદઃ ।
હંસાવતારો ભગવાન્ યત્ર જ્ઞાનમદીદિશત્ ॥ ૪૨॥

તસ્યૈવ પરિતઃ સન્તિ તીર્થાનિ સનકાદિભિઃ ।
કૃતાનિ યોગિભિઃ પુણ્યાન્યયુતાનિ ચતુર્દશ ॥ ૪૩॥

મરીચિરત્રિઃ પુલહો વસિષ્ઠઃ ક્રતુરઙ્ગિરાઃ ।
પુલસ્ત્યો દેવલઃ સોમો દક્ષો ગીષ્પતિરત્રિજઃ ॥ ૪૪॥

વરુણો ધનદો વાયુર્યમોઽગ્નિર્નિરૃતિર્વસુઃ ।
સ્વનામ્ના તીર્થમુખ્યાનિ કૃત્વા સિદ્ધિં પરાં ગતાઃ ॥ ૪૫॥

સર્વતીર્થં તતઃ પુણ્યં તીર્થૈર્યત્ર તપઃ કૃતમ્ ।
નૃહરેરર્ચનાત્પ્રાપ્તં પાપઘ્નં પુણ્યદં બલમ્ ॥ ૪૬॥

તારાતીર્થં મહાપુણ્યં યત્રતારા તપઃસ્થિતા ।
રઘુવીરપ્રસાદેન ગતા જ્ઞાનમખણ્ડિતમ્ ॥ ૪૭॥

દુર્વાસતીર્થમતુલં કપિલસ્યચ યોગિનઃ ।
યત્રૈકાક્ષરજાપ્યેન ગતાવાત્યન્તિકીં ગતિમ્ ॥ ૪૮॥

એતાન્યન્તરતો નીરાભીમયોઃ ક્ષેત્રમધ્યતઃ ।
તીર્થાન્યન્યાનિ ચ કલૌ પ્રવક્ષ્યન્ત્યન્યનામભિઃ ॥ ૪૯॥

ભીમામધ્યે ચ તીર્થાન્યધુના તે બ્રવીમ્યહમ્ ।
એષાં નામાનિ સંસ્મૃત્ય મહાપાપૈઃ પ્રમુચ્યતે ॥ ૫૦॥

@ઇતિ શ્રીપદ્મપુરાણે શ્રીનૃસિંહપુરમાહાત્મ્યે શ્રીશિવપાર્વતી
સંવાદે તીર્થમહિમાવર્ણનં નામ સપ્તમોઽધ્યાયઃ ।

## અષ્ટમોઽધ્યાયઃ

શ્રીશિવ ઉવાચ ।
દુર્ગાતીર્થં મહાપુણ્યં સર્વદુર્ગોપશાન્તિકૃત્ ।
યત્ર સ્નાનકૃતાં નૃણાં દુર્ગતિર્નાશતાં ગતા ॥ ૧॥

કાલરૂપં તતઃ પૂર્વે મહાકાલસ્ય સન્નિધૌ ।
ઉજ્જયિન્યાઃ શતગુણં ફલં યચ્છતિ મજ્જતઃ ॥ ૨॥

ભીમાનૃસિંહપુરતો મહાનાદેશ્વરોઽર્ચિતઃ ।
ક્ષેત્રાન્તરાત્કોટિગુણં ફલં યચ્છતિ નિશ્ચિતમ્ ॥ ૩॥

દુર્ગાયા વિમલે તીર્થે દેવોઽયં વિમલેશ્વરઃ ।
વારાણશ્યા અપિ મહત્ફલં યચ્છતિ પૂજિતઃ ॥ ૪॥

કુરુક્ષેત્રાત્તીર્થવરાત્ સ્થાણુર્યત શિલામયઃ ।
દાનાદ્યૈઃ પૂજિતો ભક્ત્યા ફલં યચ્છત્યસંશયમ્ ॥ ૫॥

તત્રૈવ પઞ્ચહસ્તેન કોટિતીર્થં મહાફલમ્ ।
તત્ર સ્નાત્વા સમભ્યર્ચ્ય ગોકર્ણાત્કોટિપુણ્યભાક્ ॥ ૬॥

બહૂન્યન્યાનિ ક્ષેત્રાણિ વિદ્યન્તે ચ મહેશ્વરિ ।
વિદિક્ષુ દિક્ષુ પરિતઃ ક્રમાદેવ નિબોધ મે ॥ ૭॥

તેજસ્તીર્થે મહાતેજાઃ શઙ્કુકર્ણો વિરાજતે ।
સર્વતીર્થે કૃત્તિવાસા એકામ્બરસહાયવાન્ ॥ ૮॥

કાલાઞ્જને નીલકણ્ઠ ઊર્ધ્વરેતાસ્ત્રિદણ્ડકે ।
છાગલણ્ડે કપર્દીશઃ શોભતે શ◌ૃણુ પાર્વતિ ॥ ૯॥

ગઙ્ગાયાં ચ જયન્તો વૈ પુરુકે ચાદિસંહતઃ ।

ગોકર્ણસ્યાભિતઃ સૌમ્યે સંસ્થિતઃ કુક્કુટઃ પ્રિયે ॥ ૧૦॥

તતો ભીમાજલે રમ્યે બ્રહ્માવર્તેઽથ દેવરાટ્ ।
તતોઽગ્નિતીર્થે સોમેશઃ પ્રભાસેન સહસ્થિતઃ ॥ ૧૧॥

તતો ગયાયાં ફલ્ગુસ્થો ધર્મેશઃ પરમો મહાન્ ।
વામેશ્વરાજ્જટાદેવો હરિશ્ચન્દ્રાદ્ધરીશ્વરઃ ॥ ૧૨॥

વૃષધ્વજાદ્ વૃષેશશ્ચ ભવો વૈ વાત્સનાપથાત્ ।
ભદ્રકર્ણાચ્છિવઃ સાક્ષાદ્ધર્મલિઙ્ગાદ્ધરેશ્વરઃ ॥ ૧૩॥

નેપાલાત્પશુપો દેવો દારુક્ષેત્રાત્તુ દણ્ડધૃક્ ।
ઉગ્રઃ કનકલાદુદ્રાલયાદ્રુદ્રઃ સમાગતઃ ॥ ૧૪॥

કેદારાદ્ ગર્ભઈશાનઃ સહસ્ત્રાક્ષઃ સુવર્ણતઃ ।
સર્વમેધ્યાચ્ચ સર્વેશઃ શ્રીશૈલાત્ ત્રિપુરાન્તકઃ ॥ ૧૫॥

જાલેશ્વરાત્ ત્રિશૂલી ચ કાશ્મીરાદ્વિજયેશ્વરઃ ।
આમ્લાતકાચ્ચ સૂક્ષ્મેશશ્ચણ્ડેશો મરુજાઙ્ગલાત્ ॥ ૧૬।
રુદ્રકોટાન્મહાયોગી શૂલટઙ્કઃ પ્રયાગતઃ ।
મહાવ્રતો મહેન્દ્રાચ્ચ મરુકોટાન્મહોત્કટઃ ॥ ૧૭॥

અયોગીશઃ પુષ્કરાચ્ચ કરવીરાત્કપાલભૃત્ ।
માહેશ્વર્ દીપ્તિનાથો ભૂતેશાદ્ ભસ્મગાત્રવાન્ ॥ ૧૮॥

ગઙ્ગાસાગરતો દેવોઽમરેશોઽપિ સમાગતઃ ।
વિન્ધ્યાદ્ ધરણિવારાહઃ કૈલાસાદ્ ગણનાયકઃ ॥ ૧૯॥

હેમૂકૂટાદ્ વિરૂપાક્ષઃ પાતાલાદ્ હાટકેશ્વરઃ ।
કિરાતેશઃ કિરાતારવ્યાજ્જલલિઙ્ગાજ્જલેશ્વરઃ ॥ ૨૦॥

અનલેશો વાડવાસ્યાદોઙ્કારોઽમરકણ્ટકાત્ ।
દેવકાયાદુમાનાથો વિરજસ્કાદ્ વિરોચનઃ ॥ ૨૧॥

લઙ્કાયા મરુકેશાનો ગઙ્ગાદ્વારાદ્ હિમેશ્વરઃ ।
નકુલેશાત્સ્વયમ્ભૂર્વૈ લકુલીકાત્પરોહતઃ ॥ ૨૨॥

સપ્તગોદાવરીતીર્થાદ્ ભીમેઓ ભીમવિક્રમઃ ।
કર્ણિકારાદ્ ગુણાધ્યક્ષો ત્રાગતાદ્ધિ ગદાધરઃ ॥ ૨૩॥

ભૂર્ભુવઃ સ્વઃ પતિર્દેવો ગન્ધમાદનતઃ પ્રિયે ।

કાશ્યા વિશ્વેશ્વરો દેવ ઉમાનાથઃ સમાગતઃ ॥ ૨૪॥

સમાગતાનિ તીર્થાનિ દેવતૈઃ સહ સત્પુરમ્ ।
દ્રષ્ટું નૃસિંહરૂપં વૈ સર્વાર્થૈકામરદ્રુમમ્ ॥ ૨૫॥

ભીમાયાં પઞ્ચહસ્તાનામન્તરેણ સ્થિતાન્યલમ્ ।
ઐકૈકસ્ય મહત્ત્વં હિ મયા વ્યાખ્યાતુમક્ષમમ્ ॥ ૨૬॥

અનન્તસિદ્ધિમાપન્ના એતેષુ સ્નાનદાનતઃ ।
મુક્તાઃ કતિ ન જાનેઽહં ત્રિલોકેશોઽપિ વૈ પ્રિયે ॥ ૨૭॥

અત્રાપ્યાખ્યા પુણ્યતમા ગીયન્તે નારદાદિભિઃ ।
રહસ્યં ભીમરથ્યાશ્ચ સર્વેષાં સર્વકામદમ્ ॥ ૨૮॥

એકદા મુનયઃ સર્વે તીર્થયાત્રાં ચિકીર્ષવઃ ।
વૃન્દશો ધરણીં ચેરુબ્રહ્મિષ્ઠાઃ સર્વદર્શિનઃ ॥ ૨૯॥

વિશ્વોમિત્રો વામદેવો ભરદ્વાજ ઋભુઃ ક્રતુઃ ।
અગસ્ત્યઃ કણ્વ ઉત્તઙ્કો દેવલો ભાર્ગવોઽસિતઃ ॥ ૩૦॥

વ્યાસાદ્યાઃ સઙ્ઘશઃ શિષ્યૈશ્ચરિત્વાભુવત્રયમ્ ।
શ્રાન્તા અપ્રાપ્તસન્તોષા બભૂવુસ્તે તદા પ્રિયે ॥ ૩૧॥

માર્ગે તીર્થકથાં સ્વૈરં કુર્વન્તો ગુણબુદ્ધયઃ ।
મિથો વિચારયામાસુઃ કિં શ્રેષ્ઠં તીર્થમુત્તમમ્ ॥ ૩૨॥

કઃ કાશીં કશ્ચનાવન્તી કેઽપિ તીર્થાન્યનેકશઃ ।
વિવદન્તઃ પ્રશંસતો નૈવાપુઃસ્થૈર્યમાત્મનઃ ॥ ૩૩॥

તેષુ જ્ઞાનવતાં રાજા વસિષ્ઠો મૌનમાસ્થિતઃ ।
વિજ્ઞાપિતો મુનિવરૈર્મુને કસ્માન્ન ભાષસે ॥ ૩૪॥

સ પ્રોવાચ વિવાદે વો નાસ્ત્યેકોઽપિ નિયામકઃ ।
વિનૈકં નારદમૃષિં મહાભાગવતોત્તમમ્ ॥ ૩૫॥

તે તદ્વાક્યં પ્રશંસન્તઃ પ્રોચુઃક્વાસૌ સ નારદઃ ।
વઞ્ચયિત્વાખિલાન્ ગૂઢઃ કિં તીર્થમનુસેવતે ॥ ૩૬॥

એવં હિ વિચારપરા મનોયોગાદ્વિયોગિનઃ ।
વિચિન્વાના બ્રહ્મપુત્રં ભીમાતીરે સ્થિતં યયુઃ ॥ ૩૭॥

વીરાસનાસ્થં વિમલામ્બર સૃજં વિરાગમાનન્દભરેણ પીવરમ્ ।
ભ્રૂમધ્યદૃષ્ટિં પરમં સમાધિના વિલોકયન્તં નરસિંહમાત્મનિ ॥ ૩૮॥

વીક્ષ્ય ભાવેન દેવર્ષિં બ્રહ્મર્ષિપ્રવરા નતાઃ ।
આસ્થિતા પરિતો યત્ર ભીમા દક્ષિણવાહિની ॥ ૩૯॥

પ્રોચુઃ પ્રાઞ્જલયઃ શ્રાન્તા વયં દેવ મુનીશ્વર ।
અલબ્ધાન્યત્ર વિશ્રાન્તિં પ્રાપ્તાસ્તેઽતિકમાદરાત્ ॥ ૪૦॥

મૂઢાનાં ક્લેશખિન્નાનામસ્માકં તીર્થવેદને ।
સંશયં વચસાપોહ્ય સુખકર્તુમિહાર્હસિ ॥ ૪૧॥

નારદ ઉવાચ ।
અહો બ્રહ્મર્ષયઃ પુણ્યા હિત્વા માનં ધિયં પરામ્ ।
શ્રોતું વાઞ્છા યદ્યસ્તિ વક્ષ્યે વોઽસંશયં વચઃ ॥ ૪૨॥

પુરોક્તં બ્રહ્મણા પિત્રા પુત્રેભ્યો નઃ પરં વચઃ ।
યત્ર વિષ્ણુશિવૌ યુક્તૌ નાનારૂપૌ જગત્પતી ॥ ૪૩॥

તત્ર ક્ષેત્રાણિ તીર્થાનિ દેવા મુક્તિઃ ક્રિયા ફલમ્ ।
તદહં મનસા ધ્યાત્વા સર્વતીર્થૈકસઙ્ગ્રહમ્ ॥ ૪૪॥

બ્રહ્મણો વચનાદત્ર વસામિ સુખમાદરાત્ ।
અત્ર તીર્થાનિ સર્વાણિ ક્ષેત્રાણિ ચ મહર્ષયઃ ॥ ૪૫॥

વસતિં કરોતિ પુણ્યેયં ભીમા દક્ષિણવાહિની ।
અત્ર ભુક્તિશ્ચ મુક્તિશ્ચ પુરુષાર્થોઽત્રપુષ્કલઃ ॥ ૪૬॥

ઇયં ભીમા મહાદેવો નીરા સાક્ષાદ્રમાપતિઃ ।
ઉભયોઃ સઙ્ગમો યત્ર તત્રૈવાત્યન્તિકી ગતિઃ ॥ ૪૭॥

એતદ્રહસ્યં પરમં નિધાનમિવ પીઠકે ।
ગુપ્તં ભૂગોલકે ધાત્રા સર્વેષાં મોક્ષસાધનમ્ ॥ ૪૮॥

શ્રીશિવ ઉવાચ ।
શ્રુત્વેદં નારદોક્તં વૈ દિવ્યજ્ઞાના મહર્ષયઃ ।
જ્ઞાત્વા રહસ્યં ક્ષેત્રેઽસ્મિન્નાસ્થિતા વિશ્રમં પદમ્ ॥ ૪૯॥

તતઃ પ્રભૃતિ બભૂવુસ્તે નિર્ભરાનન્દમોદિતાઃ ।
શ્રીનૃસિંહસ્થિતિજુષઃ ક્ષેત્રસ્યાસ્ય પ્રભાવતઃ ॥ ૫૦॥

યાતે કિયતિ કાલે તૈર્હતસર્વેન્દ્રિયક્રિયૈઃ ।
સમાધિનિરતૈઃ સર્વૈર્દદૃશે વૈ મહાદ્ભુતમ્ ॥ ૫૧॥

સર્વતીર્થાનિ મૂર્તાનિ ક્ષેત્રાણિ ચ મહાત્યંહો ।
પૂજયન્તિ સ્મ નૃહરિં નીરાભીમામ્બુસઙ્ગમે ॥ ૫૨॥

હરિપૂજાભરાલોકાત્પુણ્યૌઘમુપલભ્ય વૈ ।
વિચેરુઃ સ્વેષુ સ્થાનેષુ નીડેષુ પક્ષિણો યથા ॥ ૫૩॥

સાયં પ્રાતશ્ચ મધ્યાહ્નેનૃહરેઃ પૂજનોદયે ।
સર્વતીર્થાનિ ક્ષેત્રાણિ દ્રષ્ટું યાન્તિ દિનેદિને ॥ ૫૪॥

ઇત્યાલોક્યાદ્ભુતં સર્વે વિસ્મિતા નૃહરેઃ પદમ્ ।
પ્રશંસન્તો વિચેરુસ્તે સ્વસ્વમાલયમાદરાત્ ॥ ૫૫॥

@ઇતિશ્રીપદ્મપુરાણે શ્રીનૃસિંહપુરમાહાત્મ્યે શ્રીશિવપાર્વતીસંવાદે
ભીમામઘતીર્થવર્ણનં નામ અષ્ટમોઽધ્યાયઃ ।

## નવમોઽધ્યાયઃ

ગોતીર્થં પ્રથિતં લોકે શ ૃણુ ત્વં મૃગલોચને ।
યદાખ્યાનં પિતૃગણૈર્મુદા સંસ્તૂયતે સદા ॥ ૧॥

પ્રહ્લાદાય પ્રસન્નાય પ્રસન્નં જગતાં પતિમ્ ।
યયુર્દ્રષ્ટું સુરેશાનં મુનીન્દ્રાદ્યા વરૂથશઃ ॥ ૨॥

આકીર્ણવલયૈઃ પુષ્પૈઃ સ્તુત્વા સ્તોત્રૈરનેકશઃ ।
મહાભિષેકસમ્ભારં ચક્રુસ્તે પરમાદરાત્ ॥ ૩॥

પઞ્ચામૃતાનિ સરિતાં પીઠં પુણ્યતમૈર્જલૈઃ ।
ઓષધીર્ધરણીદેવી પીઠં શેષોઽપ્યુપાનયત્ ॥ ૪॥

તદા કામદુહો ગાવો બભૂવુર્વૈ સહસ્રશઃ ।
નારસિંહં સમાલોક્ય પ્રસ્તુતસ્તનમન્ધરાઃ ॥ ૫॥

આગત્ય ચિન્તામણિના કૃતં નીરાજનં પ્રિયે ।
વામે સ્થિતેન ભક્ત્યા તં વવર્ષુઃ પાયસીં સૃતિમ્ ॥ ૬॥

પયસા સ્નાપયિત્વેશં ગાવો દક્ષિણતઃ સ્થિતાઃ ।
માર્ગયન્ત્યો નૃહરેઃ પ્રસાદં વિમલાશયાઃ ॥ ૭॥

તાં સમાલોક્ય સંસિદ્ધિં ચેતસો ભક્તિભાવિતમ્ ।
ઉવાચેદં પ્રસન્નાત્મા નૃહરિર્ભક્તવત્સલઃ ॥ ૮॥

શ્રીભગવાનુવાચ ।
વરો વઃ શ્રૂયતાં ગાવો ભક્ત્યા તુષ્ટસ્ય મે પરઃ ।
ભવતીભિઃ પયોધારા મુક્તા યા મમ મૂર્ધનિ ॥ ૯।
ધારાતીર્થં તદેવેદં ગોતીર્થમિતિ વિશ્રુતમ્ ।
ભવિષ્યતિ મહાપુણ્યં પિતૃણાં તોષકારણમ્ ॥ ૧૦॥

કુરુક્ષેત્રે પ્રયાગે ચ ગયાયામન્યધામસુ ।
યા તૃપ્તિઃશતવર્ષૈઃસ્યાચ્છ્રાદ્ધે સા લભ્યતે સકૃત્ ॥ ૧૧॥

ગોતીર્થે સ્નાનદાનાદિ કુર્વતાં વસતિઃ પ્રિયે ।
કલ્પાન્તે મત્પ્રસાદેન ભવેદ્ધિ સન્નિધૌ મમ ॥ ૧૨॥

દક્ષે કામદુહો વામે ચિન્તામણિગણેશ્વરઃ ।
પૃષ્ઠે કલ્પદ્રુમોઽશ્વત્થઃ પ્રિયં મે ત્રયમુત્તમમ્ ॥ ૧૩॥

પર્વપર્વસુ ગોયાત્રા ચતુર્થ્યાં ગણપૂજનમ્ ।
મન્દવારેઽશ્વત્થસેવા નિયતા સફલાર્થિનામ્ ॥ ૧૪॥

અહો તીર્થાનિ સરિતો દેવર્ષિમનુજાદયઃ ।
ગોતીર્થે સ્નાતતૃપ્ત્યર્થં પિતૃણાં કામસિદ્ધયે ॥ ૧૫॥

શ્રીશિવ ઉવાચ ।
આદેશમિમમાકર્ણ્ય સર્વે ગોપયસાં હૃદે ।
ચક્રુઃસ્નાનાનિ દાનાનિ પિતૃણાં તૃપ્તિહેતવે ॥ ૧૬॥

તદા પ્રજાનાં પિતરસ્તત્ક્ષણાદ્દિવ્યવર્ચસઃ ।
મૂર્તસ્તુષ્ટાઃપુષ્ટદેહાસ્તુષ્ટુવુર્નૃહરિમ્મુદા ॥ ૧૭॥

યો લીલયાત્મનિજગદ્વિતનોત્યનન્તઃ પુષ્ણાતિ નિર્મલસુધાનયનેન નિત્યમ્ ।
સદ્યઃસ્વરૂપમહસાભિવૃણોતિ સર્વં તસ્યાદ્ય તૃપ્તિકરણે કતમઃ પ્રયાસઃ ॥ ૧૮॥

સર્વેષુ દેહિષુ સમં સદનન્તમાદ્યં પૂર્ણં શિવં સદસતઃ પરમેકસંસ્થમ્ ।
યસ્ત્વદ્વિતીયમુદયાસ્તમયાદિહીનં શશ્વત્પ્રશાન્તમભયં તમજં પુરાણમ્ ॥ ૧૯॥

યસ્યેક્ષયૈવપરિજીવતિ જીવસઙ્ઘો નશ્યત્યસૌઽનીક્ષિત એવ તેન ।
જાનન્નપિ પ્રભુવરં ન ભજત્યસૌ ત્વાં હા હા હતઃ કથમહો તમસા વિમૂઢઃ ॥ ૨૦॥

ત્વં વિશ્વમૂર્તિમતઃ પિતામહો નઃ પૂજ્યઃ સ્વધાભિરનઘઃ પરિપૂર્ણકામઃ ।
આત્માત્મના રમયસેઽસ્ય વિભૂતિભાજસ્તત્તે ગુરો વિલસનં સુહિતાય પુંસામ્ ॥ ૨૧॥

અદ્ય પ્રભો ભવદનુગ્રહતોઽતિતૃપ્તાઃ સર્વે વયં પિતૃગણા ન તથાન્યતીર્થે ।
જાનીમહે કરુણયા યદીક્ષસે ત્વં તત્પૂર્ણતાં નયસિ નૂનમમોઘશક્તે ॥ ૨૨॥

ત્વન્નામમન્ત્રમહિમાર્થપરાઃ પ્રશાન્તાઃ સ્વાત્માવબોધભરપૂર્ણમનોવિલાસઃ ।
કુર્વન્તિ દૃષ્ટિસુધયાન્યજનાન્વિમુક્તાન્ ત્વં તૃપ્તિમુન્નયસિ નઃ કિમહોઽત્રચિત્રમ્ ॥ ૨૩॥

અદ્યપ્રભૃત્યવનતાખિલકામન્દતત્ ત્વત્સન્નિધૌ સ્થિતામિહાસ્તુ સુતૃપ્તયે નઃ ।
યત્રાભિમજ્જનસુદાનસુતર્પણાદ્યૈસ્તૃપ્તિર્ભપિતૃષુ કલ્પશતાયુતૈર્વૈ ॥ ૨૪॥

યજ્ઞાય સર્વમતયેઽખિલદેવમન્ત્રવિપ્રાગ્નિસંસ્થિતહવિઃ ફલશુદ્ધિધામ્ને ।
યોગાવબોધવપુષે ગુણકામસીમ્ને સર્વાત્મનાખિલદૃશે બૃહતે નમસ્તે ॥ ૨૫॥

શ્રીભગવાનુવાચ ।
અસ્તુવઃ પિતૃ તૃપ્ત્યર્થમેતદ્વોતીર્થમુત્તમમ્ ।
એતત્સંસેવનાનૃણાં ન કામાનામાતિગ્રહઃ ॥ ૨૬॥

યદહં પયસાં પૂરૈઃ પ્લાવિતોઽત્ર હિ મૂર્ધનિ ।
સેવનાત્તસ્ય તીર્થસ્ય દારિહરં નોપજાયતે ॥ ૨૭॥

ઇયં ભૂઃ કામધુગ્દેવી કલ્પવૃક્ષા મહીરુહાઃ ।
ચિન્તામણિગણાઃ સર્વે દૃષદો મત્પરિગ્રહાત્ ॥ ૨૮॥

એવં મહાભિષેકેઽસ્મિન્નભિષિક્તોઽસ્મદાદિભિઃ ।
નીરાજિતો દેવતાભિઃ સંસ્તુતો મુનિસત્તમૈઃ ॥ ૨૯॥

પ્રાર્થિતોઽથ પ્રસન્નાત્મા પ્રણતાનન્દવારિધિઃ ।
દેવેશઃ સ્થીયન્તા પ્રીત્યા સર્વેષાં હિતસિદ્ધયે ॥ ૩૦॥

તથેતિતાનનુશ્રુત્ય લક્ષ્મીમાલિઙ્ગ્ય લીલયા ।
સર્વરૂપોઽનન્તશક્તિસ્તત્રાદૃશ્યોઽભવત્ક્ષણાત્ ॥ ૩૧॥

ઇતસ્તતઃ પ્રગૃણતાં સર્વેષાં નઃ કૃપાનિધિઃ ।
નભોરૂપોઽવદદ્દેવો મુનયોઽહં વસામિ વૈ ॥ ૩૨॥

ઇદમેવ મહદ્રૂપં વ્યોમ મે સર્વકારણમ્ ।
જપતાં ધ્યાયતાં નૃણાં કૈવલ્યાદ્યખિલાર્થદમં ॥ ૩૩॥

મન્ત્રરાજેન નામ્ના માં યેઽત્ર નિત્યં સ્તુવન્ત્યહો ।

તેષાં ન ચિત્તતો દૂરે ભવામિ વ્કાપિ સર્વગઃ ॥ ૩૪॥

અહમદૃશ્યરૂપેણ સ્થિતઃ સર્વાન્તરાત્મનિ ।
પૂજિતો ભાવિતઃ પ્રેમ્ણા દદામ્યાત્માનમપ્યજઃ ॥ ૩૫॥

યથા યા સદ્ભુતી મૂર્તિઃ પ્રલ્હાદાર્ભપ્રતિષ્ઠિતા ।
તથા દદામિ સત્કામાન્કૈવલ્યમતિ વાઞ્છિતમ્ ॥ ૩૬॥

ભવન્તઃ શક્તિભિઃ સ્વાભિરત્ર તિષ્ઠન્તુ સર્વદા ।
રક્ષણાયાસ્ય પરિતઃ ક્ષેત્રરાજસ્ય સત્તમાઃ ॥ ૩૭॥

ઇત્યુક્તવન્તં મુનિવરાઃ પ્રણમ્ય વ્યોમરૂપિણમ્ ।
શક્તીઃ સ્વાઃ સ્વાઃ પ્રતિષ્ઠાપ્ય ગતાઃ સ્વં સ્વં પદં મુદા ॥ ૩૮॥

ઇતિ તેઽભિહિતો દેવિ ગોતીર્થપ્રભવો મુદા ।
સઙ્ક્ષેપાદ્ વિસ્તરં વક્તું ન ક્ષમોઽહં કુતોઽપરે ॥ ૩૯॥

ગોતીર્થપ્રભવં ત્વેતં યે પઠન્તિ દ્વિજોત્તમાઃ ।
નયન્ત્યાકલ્પિકીં તૃપ્તિ પિતૄન્ મમ સ્વરૈઃ ॥ ૪૦॥

@ઇતિ શ્રીપદ્મપુરાણે નૃસિંહપુરમાહાત્મ્યે શ્રીશિવપાર્વતીસંવાદે
ગોતીર્થપ્રભવો નામ નવમોઽધ્યાયઃ ।

## દશમોઽધ્યાયઃ

શ્રીશિવ ઉવાચ ।
ગોતીર્થાત્પૂર્વતોદેવિ ભાનુતીર્થમનુત્તમમ્ ।
તપસ્તપ્ત્વા રવિર્યત્ર પ્રાપ્તવાન્ જ્ઞાનમુત્તમમ્ ॥ ૧॥ ।

તત્તીર્થમજ્જનકૃતાં રવૌ સૂર્યગ્રહક્રમે ।
ગ્રહાઃ પ્રશમમાયાન્તિ ન વિશત્યજ્ઞાનજન્તમઃ ॥ ૨॥

સૂર્ય આત્માસ્ય જગતઃ પ્રિયે સ્થિત્વા મહાપ્રભઃ ।
આત્માવબોધસમ્પન્નો નિત્યં યત્ર પ્રકાશતે ॥ ૩॥

સર્વકામિકમેતદ્ધિ તીર્થં સર્વવરપ્રદમ્ ।
ભવવ્યાધિહરં નૃણાં સેવનાત્સ્નાનતર્પણાત્ ॥ ૪॥

તસ્યાગ્રે ચક્રતીર્થંહિ પ્રહ્લાદસ્યાવનાય યત્ ।
હરિણા પ્રેષિતં ચક્રં યત્રોદિતમનુત્તમમ્ ॥ ૫॥

ચક્રતીર્થૈકભક્તાનાં ન ભયં કાલચક્રજમ્ ।
સંસારચક્રવ્યાવૃત્તિર્નચ કલ્પેત પાર્વતિ ॥ ૬॥

ચક્રાવતારો નૃહરિઃ સદા રક્ષતિ વૈ જગત્ ।
ભજતાં કામદોઽત્યર્થં યથા કલ્પદ્રુમો નૃણામ્ ॥ ૭॥

નન્દકાખ્યં ચ તીર્થં વૈ સર્વાનન્દમનુત્તમમ્ ।
તદગ્રે પાશતીર્થં વૈ ભવપાશનિકૃન્તનમ્ ॥ ૮॥

તદગ્રે લાઙ્ગલં તીર્થં કષર્ણં કામસમ્પદા ।
તદગ્રે મૌસલં નામ દુઃખપર્વતમર્દનમ્ ॥ ૯॥

એતાનિ ભીમમગ્નાનિ તીર્થાનિ પરમાણિ વૈ ।
પ્રત્યેકં ધનુષાં પઞ્ચવિંશત્યા ગણિતં પ્રિયે ॥ ૧૦॥

અન્યાનિ બહુશસ્તીર્થાન્યાદૃતાનિ સુરેશ્વરૈઃ ।
પુરાણેષુ પ્રપઠ્યન્તે સર્વેષુ પ્રાણવલ્લભે ॥ ૧૧॥

સર્વેયં તીર્થરૂપાભૂઃ સર્વદેવમયોહરિઃ ।
સર્વાગમરસા ભીમા નીરા સર્વફલૌધિની ॥ ૧૨॥

સ્નાતવ્યં સઙ્ગમે નિત્યં તર્પણીયા દ્વિજેશ્વરાઃ ।
પૂજનીય નરહરિઃ પ્રાપ્તવ્યં પરમં પદમ્ ॥ ૧૩॥

અત્ર તીર્થાનિ સર્વાણિ મન્ત્રા ણ્યત્ર પ્રતિષ્ઠિતાઃ ।
દેવતા નૃહરિર્યત્ર કિમન્યદવશિષ્યતે ॥ ૧૪॥

સ્નાનં દાનં તર્પણં ચ પુમાન્યત્ર કરોતિ યઃ ।
સર્વતીર્થોદ્ભવં પુણ્યં પ્રાપ્નુયાત્ સ પદે પદે ॥ ૧૫॥

@ઇતિ શ્રીપદ્મપુરાણે નૃસિંહપુરમાહાત્મ્યે શ્રીશિવપાર્વતીસંવાદે
ભીમામગ્મતીર્થવર્ણનં નામ દશમોઽધ્યાયઃ ।

## એકાદશોઽધ્યાયઃ

દેવ્યુવાચ ।
વિચિત્રમિદમાખ્યાનં તીર્થાનાં ભગવન્મુખાત્ ।
શ્રુતં પાપહરં પુણ્યં સર્વેષાં મોક્ષસિદ્ધિદમ્ ॥ ૧॥

ઇદાનીં કથય સ્વામિન્યાત્રાનિર્ણયમુત્તમમ્ ।

યં વિજ્ઞાય નરો યાતિ ક્ષેત્રં પુણ્યફલં વરમ્ ॥ ૨॥

શ્રીશિવ ઉવાચ ।
યાત્રાં સાંવત્સરીં દેવિ માસાં નિત્યાં તથા શૃણુ ।
નૃહરેઃ પ્રીયતે યા હિ કૃતાઃ પૂર્વમહર્ષિભિઃ ॥ ૩॥

જયન્ત્યાં માધવે શુક્લે ભૂતે પાતે ચ સ્વાતિભે ।
યાત્રા સાંવત્સરી કાર્યા વાર્ષિકી સિદ્ધિમિચ્છતા ॥ ૪॥

તસ્યાં સ્નાનજપધ્યાનપૂજાહવનતર્પણૈઃ ।
કોટિયાગફલં સ્ફીતં ભુક્ત્વા યાન્તિ હરેઃ પદમ્ ॥ ૫॥

રામસ્ય કૃષ્ણસ્ય જયન્ત્યાં વા સર્વાસુ શિવરાત્રિષુ ।
યાત્રા કાર્યા જયન્તીવત્તત્રોપોષણતત્પરૈઃ ॥ ૬॥

યદા દૈત્યો હતઃ સાયં હરિણા સિંહરૂપિણા ।
તસ્મિન્ કાલેઽનિશં દેવો દૃષ્ટો હન્તિ જનુઃશતમ્ ॥ ૭॥

પર્વપર્વસુ ગોતીર્થે સ્નાનં પૂજાહરેઃ પરા ।
સઙ્ક્રાતિગ્રહણર્ક્ષેષુ ભાનુતીર્થે તથૈવ ચ ॥ ૮॥

સોમશ્રવણયોગે તુ પ્રહ્લાદસ્ય હરિઃ સ્વયમ્ ।
દર્શયામાસ સુરૂપં તત્ર યાત્રાહિ માસિકી ॥ ૯॥

સાયં પ્રાતર્મધ્યાહ્ને વૈ યાત્રા દૈનન્દિની મતા ।
સર્વકલ્યાણજનની સર્વાઘૌઘવિનાશિની ॥ ૧૦॥

જયન્ત્યઃ શિવરાત્રીશ્ચ તથા હરિદિનાનિ વૈ ।
સદોપોષ્યાણિ સુધિયા જન્મસાફલ્યમિચ્છતા ॥ ૧૧॥

એતાસુ સર્વ પાપાનિ તિષ્ઠત્યન્નાશ્રયેણ વૈ ।
તસ્માત્સર્વાત્મના ધીમાનેતાસૂપવસેત્ સદા ॥ ૧૨॥

નવમી ચૈત્રશુક્લસ્ય શ્રાવણસ્યાસિતાષ્ટમી ।
શ્રવણદ્વાદશી ભાદ્રે રાધે શુક્લચતુર્દશી ॥ ૧૩॥

અનુરાધોત્તરાપુષ્યરોહિણીશ્રવણૈર્યુતા ।
એકાદશી દ્વાદશી વા મઘાયુક્તા ચતુર્દશી ॥ ૧૪॥

એતાસુ પુરુષો ધીમાન્ નાશ્નીયાત્ કિમપિ પ્રિયે ।
અન્નમશ્ન્ પ્રમાદેન યાતિ ઘોરાંસ્તુ નારકાન્ ॥ ૧૫॥

પૂજાહોમસ્તુતિગતં જાગરો બ્રાહ્મણાર્ચનમ્ ।
ઉપવાસઃ પારણાન્તે વિધિઃ સાધારણોઽહિ ॥ ૧૬॥

નિત્યં પૂજાં હરેઃ પશ્યંસ્તીર્થાણાં ફલમાપ્નુયાત્ ।
પ્રાપ્નુયા વૈ યજ્ઞફલં પશ્યન્નીરાજનં હરેઃ ॥ ૧૭॥

નૈવેદ્યસમયે દેવં યઃ પશ્યતિ વિમૂઢધીઃ ।
સર્વાપરાધમલિનો દણ્ડ્યોઽસૌ યમકિઙ્કરૈઃ ॥ ૧૮॥

નૈવેદ્યાન્તે તુ નૃહરિં સુપ્રસન્નં વિલોકયન્ ।
તીર્થકોટિફલં લબ્ધ્વા ધન્યજન્મા ભવેન્નરઃ ॥ ૧૯॥

અપરાધકૃતાં પુંસાં તીર્થે વાસો ન શક્યતે ।
તીર્થે પાપકૃતાં યસ્માત્સુખં નાસ્તિ યુગેષ્વપિ ॥ ૨૦॥

પરાપવાદનિરતા હિંસ્રા યે દુષ્પ્રતિગ્રહાઃ ।
દુરાચારા નરાસ્તેષાં તીર્થે વાસો ન ચોત્તમઃ ॥ ૨૧॥

તીર્થે પ્રવેશમાપન્નાઃ સર્વે નિષ્પાપપઞ્જરાઃ ।
તીર્થે વાસકૃતા મર્ત્યા અપ્યમર્ત્યા મતાઃ શિવે ॥ ૨૨॥

તીર્થે પાપકૃતાં ઘોરાં વિષ્વક્સેનસ્ય યાતનાઃ ।
પશ્યતાં તુ નૃહરિં ભક્ત્યા યમદૂતા ન ગોચરાઃ ॥ ૨૩॥

નૃસિંહનામવિધ્વસ્તપાપકઞ્ચુકનિર્મલાઃ ।
પ્રયાન્તિ નૃહરેર્લોકં યોગિનામપિ દુર્લભમ્ ॥ ૨૪॥

@ઇતિ શ્રીપદ્મપુરાણે નૃસિંહપુરમાહાત્મ્યે શ્રીશિવપાર્વતીસંવાદે
યાત્રાનિર્ણયવર્ણનં નામ એકાદશોઽધ્યાયઃ ।

## દ્વાદશોઽધ્યાયઃ

દેવ્યુવાચ ।
શ્રુતોઽયં નિર્ણયો દેવ યાત્રાયાઃ પરમોત્સવઃ ।
મઙ્ગલાનાં નરો યસ્મિન્ પ્રાપ્યતે લીલયા પદમ્ ॥ ૧॥

ઇદાનીં શ્રોતુમિચ્છામિ હરેઃ પૂજાવિધિં પરમ્ ।
યેનાસૌ પૂજિતસ્તુષ્ટો દદાત્યાત્માનમીશ્વરઃ ॥ ૨॥

શ્રીશિવ ઉવાચ ।
દેવિં પૂજાવિધેરસ્યાનન્તસ્યાન્તો ન વિદ્યતે ।
સર્વાર્થૈકભુજસ્યાસ્ય સર્વેપ્રત્યયસાક્ષિણઃ ॥ ૩॥

તથાપિ હિતકામાયાસ્તવ પ્રેમ્ણા નૃણાં પ્રિયે ।
વદામિ સૂત્રતો દેવિ પૂજાક્રમમનુત્તમમ્ ॥ ૪॥

ત્રિવિધો યોગ ઈશસ્ય વૈદિકો મિશ્રતાન્ત્રિકૌ ।
અધિકારવિભેદેન કથિતો હરિણા મમ ॥ ૫॥

વેદપ્રયોગતો વેદ્યસ્તાન્ત્રિકસ્તન્ત્રશાસનાત્ ।
ઉભયાનુષ્ઠિતો મિશ્ર ઇતિ જાનીહિ તત્ત્વતઃ ॥ ૬॥

એતેષ્વેકેન નૃહરિં મન્ત્રરાજૈર્યજન્નરઃ ।
પ્રાપ્નોતિ નિખિલાં સિદ્ધિમભીષ્ટામાત્મદેશ્વરાત્ ॥ ૭॥

પ્રતિમાયાં જલે વાયૌ વન્હૌં હૃદિ તથા પ્રિયે ।
આકાશે સ્વાત્મનિ પ્રેમ્ણા યજેન્તૃહરિં પુમાન્ ॥ ૮॥

સ્વાત્મન્યાત્મતયાત્માનમાકાશે વિયદાત્મના ।
તત્તત્તોષેણ લોકેષુ સર્વાન્તર્યામિનિષ્ઠયા ॥ ૯॥

હૃદિભાવાર્પણૈરગ્નૌ હવિષા ચેષ્ટયાનિલે ।
જલે જલોપચારેણ પૂજયેન્નૃહરિં મુદા ॥ ૧૦॥

પ્રતિમા સૈકતી લેપ્યા લેખ્યા દાર્વી શિલામયી ।
મણિરૂપા ધાતુમયી પાર્થિવેતીયમષ્ટધા ॥ ૧૧॥

એતાસ્વાવાહનોદ્વાસા ઉક્તૌ પૂજાવિધિં શૃણુ ।
લેખ્યાલેપ્યાપાર્થિવાસુ સસ્નાનં માર્જનં પ્રિયે ॥ ૧૨॥

ન ગન્ધલેપો લેખ્યાયામન્યઃ સાધારણો વિધિઃ ।
એષ જઙ્ગમરૂપાસુ કથિતસ્તત્ત્વતો વિધિઃ ॥ ૧૩॥

સ્થાવરાસુ ન ચાર્ચાસુ વિસર્ગાવાહન પ્રિયે ।
પૂર્વમેવ પ્રતિષ્ઠા હિ જાતા દેવસ્ય પાર્વતિ ॥ ૧૪॥

ચરાસ્વપિ ચ શૈલાસુ શાલગ્રામાદિષુ સ્ફુટમ્ ।
હરેર્મમ ગણેશસ્ય તવ સાધ્યાસ્તથૈવ ભોઃ ॥ ૧૫॥

અત્રૈવ ભક્તરાજેન સ્થાવરામૂર્તિસ્થાપનમ્ ।

કૃતં પૂજાવિધાનેન તન્મે નિગદતઃ શ઼ૃણુ ॥ ૧૬॥

પ્રાતઃ શૌચં વિધાયાદૌ દન્તાનાશોધ્ય મન્ત્રવાન્ ।
સ્નાયાન્મૃદાદિભિઃ સર્વૈર્મન્ત્રૈર્વારુણવૈષ્ણવૈઃ ॥ ૧૭॥

વાસસી પરિધાયાથ કૃતસન્ધ્યાદિ સ્ક્રિયઃ ।
સમુખઃ સ્વસ્થ આસીત પૂજાભારૈઃ સુસમ્ભૃતૈઃ ॥ ૧૮॥

પ્રિયે કૃત્વા ન્યાસવિધિં પ્રાણાનાયમ્ય વાગ્યતઃ ।
શોધયેદ્ વાયુતેજોભ્યાં પિણ્ડં પીયૂષજીવનમ્ ॥ ૧૯॥

હૃત્પદ્મકર્ણિકામધ્યં હૃદયાકાશબન્ધુરમ્ ।
નાદાન્તે ભાવયેદીશં જ્યોતિરૂપમખણ્ડિતમ્ ॥ ૨૦॥

તેન સંયુક્તહૃદયો નિર્મલો ગગનોપમઃ ।
સર્વદેવાધિરૂપાં તાં મૂર્તિં ધ્યાયેદ્ વિશુદ્ધધીઃ ॥ ૨૧॥

સૂક્ષ્માત્સૂક્ષ્મતરં દેવં ભાવયન્ પરમાત્મનમ્ ।
શનૈરગ્રસ્થિતાં મૂર્તિંચર્ચયેદ્ વિધિપૂર્વકમ્ ॥ ૨૨॥

મૂલેન મન્ત્રરાજેન વ્યૂહે ષોડશશક્તિભિઃ ।
યુક્તં યજેન્નૃહરિં પીઠાર્ચનવિધાનતઃ ॥ ૨૩॥

મહાચક્રક્રમેણાસ્ય કુર્યાદાવરણાનિ વૈ ।
બ્રહ્માવિષ્ણુશિવાદીનાં મન્ત્રરાજાત્મકાનિ ચ ॥ ૨૪॥

પ્રત્યેકાવરણે શ્રીશં યોગપીઠસ્થિતં હરિમ્ ।
પૂજયેત્પર યા ભક્ત્યા મોક્ષસાધનલિપ્સયા ॥ ૨૫॥

પાદ્યાર્ઘ્યાચમનસ્નાનવસ્ત્રસૂત્રવિભૂષણૈઃ ।
ગન્ધમાલ્યાદિભિર્ધૂપૈર્નૈવેદ્યૈઃ ષડ્રસૈઃ સહ ॥ ૨૬॥

ફલતામ્બૂલભોગાદ્યૈર્ગીતૈઃ સ્તોત્રૈઃ સુમઙ્ગલૈઃ ।
તૌર્યત્રિકૈઃ પુરાણાખ્યાજ્ઞાનાદેશૈરનેકશઃ ॥ ૨૭।
છત્રચામરકૈર્યાનૈર્વ્યજનૈર્દર્પણાદિભિઃ ।
નાનોપહારબલિભિઃ સામનીરાજનાદિભિઃ ॥ ૨૮॥

અન્યૈર્મહોપચારૈશ્ચ નાનાવિભવવિસ્તરૈઃ ।
પ્રદક્ષિણાભિર્નતિભિશ્ચાર્થયિત્વા ક્ષમાં ગુરુમ્ ॥ ૨૯॥

પુષ્પાઞ્જલિ સમયતે શેષં દેવાજ્ઞયા મુદા ।

દ્વિજાતિભ્યો વિભજ્યાથ ગૃહણીયાન્મોક્ષસિદ્ધયે ॥ ૩૦॥

દેવાનગ્નિ વિપ્રાંશ્ચ પૂજયેદ્યઃ સમાહિતમ્ ।
સર્વાન્કામાનવાપ્નોતિ કૈવલ્યમપિ વૈ પુમાન્ ॥ ૩૧॥

દેવાગ્રે પુષ્પવાટી યો કુરુતે ભક્તિતો નરઃ ।
યાવત્પુષ્પદલાગ્રાણિ તાવત્કલ્પં સ નાકભાક્ ॥ ૩૨॥

દેવપૂજાસુ નિર્વાહવૃત્તિં યઃ કલ્પયેત્ સુધીઃ ।
દિને દિનેઽશ્વમેધસ્ય ફલં તસ્ય ન સંશયઃ ॥ ૩૩॥

જીર્ણોદ્ધારેણ સર્વેષ્ટં પ્રાપ્ય ભોગાન્ પ્રતિષ્ઠયા ।
અર્ચયાપ્નોતિ વૈકુણ્ઠ ત્રયેણાપ્નોતિ સદ્ગતિમ્ ॥ ૩૪॥

યસ્તુ વૈ દ્વિજવર્યાણાં વૃત્તિં નાશયતે કુધીઃ ।
યાવલ્લોમાનિ દેહેઽસ્ય તાવત્કલ્પં સ નારકે ॥ ૩૫॥

ઇતિ તે સર્વમાખ્યાતં ગુહ્યં યન્મોક્ષસાધનમ્ ।
નૃહરેઃ પુરમાહાત્મ્યં કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૩૬॥

દેવ્યુવાચ ।
સ્વામિન્મહોત્તમં ક્ષેત્રં નૃહરેઃ પદભૂષિતમ્ ।
એતન્માહાત્મ્યમાકર્ણ્ય ધીર્મે પુષ્ટિં પરાં ગતા ॥ ૩૭॥

અત્ર સ્થેયં ભગવતા મયાસહ હિતેચ્છયા ।
જનાનાં પુણ્યકામાનાં માર્ગં દર્શયતા ગુરો ॥ ૩૮॥

શ્રીશિવ ઉવાચ ।
શિવે જાનીહિ નૃહરૌ ત્રયો દેવા વયં સદા ।
નિવસામો જનાનાં હિ હિતાર્થાય ન સંશયઃ ॥ ૩૯॥

અત્ર માં વા વિધિં વિષ્ણું ભેદદૃષ્ટ્યાભિમન્વતે ।
તેષાં કલ્પશતેનાપિ ન સિદ્ધિઃ પારમાર્થિકી ॥ ૪૦॥

દેહાકારો ભવેદ્બ્રહ્મા નામમાત્રો હરિઃ સ્વયમ્ ।
પૂજાભિમાની રુદ્રો હિ ત્રયમાત્મૈવ કેવલમ્ ॥ ૪૧॥

એતન્મતં મે જાનન્તિ સનકાદ્યા મહર્ષયઃ ।
મરીચ્યાદ્યાશ્ચ મનવો લોકપાલાઃ ખગેશ્વરઃ ॥ ૪૨॥

ગન્ધર્વાપ્સરસો નાગાઃ પ્રલ્હાદાદ્યાસ્તથાસુરાઃ ।

કિં દેવાઃ કિન્નરા યક્ષા રક્ષઃ કિં પુરુષાદયઃ ॥ ૪૩॥

સર્વે સ્વલાભસન્તુષ્ટા અન્તે યાસ્યન્તિ સદ્ગતિમ્ ।
મુક્તા વૈ બહવઃ સિદ્ધા એતેનૈવ મતેન મે ॥ ૪૪॥

ય એતદવજાનન્તિ મૂઢા દેહાત્મમાનિનઃ ।
ન ભવેન્મુક્તતા તેષાં ત્રિષુ કાલેષ્વપિ પ્રિયે ॥ ૪૫॥

અથાપિ રૂપવાનગ્રે દેવસ્ય પાર્શ્વયોઃ ।
ત્વયા તિષ્ઠામિ મધ્યે ચ સર્વેષાં સુખહેતવે ॥ ૪૬॥

એતત્પુણ્યતમાખ્યાનં પ્રયતઃ શ્રુણુયાત્પઠેત્ ।
સર્વાન્ ભોગવરાન્ ભુક્ત્વા પ્રાન્તે નૃહરિમાપ્નુયાત્ ॥ ૪૭॥

સર્વવેદેષુ યત્પુણ્યં સર્વતીર્થેષુ યત્ફલમ્ ।
સર્વપૂજાસુ યત્પ્રોક્તં પ્રાપ્નુયાદસ્ય કીર્તનાત્ ॥ ૪૮॥

સૂત ઉવાચ ।
એવમુક્ત્વા શિવો ગૌરીં પ્રેમ્ણાલિઙ્ગ્ય મુદાયુતામ્ ।
ઉદરે નૃહરેર્મૂર્તેઃ પ્રવિવેશ દયોદધેઃ ॥ ૪૯॥

એવં ભોઃ કથિતં ગુહ્યમિતિહાસેન સત્તમાઃ ।
નૃણાં નિઃશ્રેયસાર્થાય સર્વકામૌઘસિદ્ધયે ॥ ૫૦॥

એતત્પુણ્યતમાખ્યાનં વ્યાસેન પરિકીર્તિતમ્ ।
જ્ઞાનવૈરાગ્યયુક્તાય પુત્રાય શુકાય વૈ ॥ ૫૧॥

શ્રુણુયાત્ કીર્તયેદ્ યો વા નૃસિંહપુરવર્ણનમ્ ।
દયાર્ણવસ્ય નૃહરેઃ સાયુજ્યપદમર્હતિ ॥ ૫૨॥

વ્યાસ ઉવાચ ।
ઇતિ સૂતાત્સમાકર્ણ્ય માહાત્મ્યં પુરસમ્ભવમ્ ।
પ્રશંસન્તો મુદાયુક્તાસ્તં પ્રણમ્ય યયુર્ગૃહાન્ ॥ ૫૩॥

નૃસિંહપુરમાહાત્મ્યં શ‍ૃણોતિ પઠતીહ યઃ ।
કિં તસ્યાન્યેન પુણ્યેન મુક્તોઽસૌ ભવબન્ધનાત્ ॥ ૫૪॥

કિમત્ર બહુનોક્તેન વર્તમાનોઽપિ સર્વદા ।
ન લિપન્તિ દુઃખલેશેન સ નરો નાત્ર સંશય ॥ ૫૫॥

ઇતિ શ્રીપદ્મપુરાણે શ્રીનૃસિંહપુરમાહાત્મ્યે શ્રીશિવપાર્વતી

સંવાદે હરિપૂજાવિધિર્નામ દ્વાદશોઽધ્યાયઃ ।

ૐ તત્સત્ ।

ઇતિ શ્રીનૃસિંહપુરતીર્થમહિમાવર્ણનં સમ્પૂર્ણમ્ ।

Proofread by Manoj Kumar Barman

*Shri Nrisimhapuratirthamahimavarnanam*
pdf was typeset on August 11, 2025

Please send corrections to *sanskrit@cheerful.com*